अथैकोनविंशोऽध्यायः।

ग्रहवर्षफल.

सर्वत्र भूर्विरलसस्ययुता वनानि दैत्याद्विपाश्रयिषुदंष्ट्रिसमाकुलानि। स्यन्दन्ति नैव च पयः प्रचुरं स्रवन्त्यो रुग्भेषजानि न तथातिबलान्वितानि॥ १॥ तीक्ष्णं तपत्यदितिजः शिशिरेऽपि काले नात्यम्बुदा जलमुचोऽचलसन्निकाशाः। नष्टप्रभर्क्षगणशीतकरं नभश्च सीदन्ति तापसकुलानि सगोकुलानि॥ २॥ हस्त्यश्वपत्तिमदसह्यबलैरुपेता बाणासनासिमुशलातिशयाश्चरन्ति। घ्नन्तो नृपा युधि नृपाननुचरैश्च देशान् संवत्सरे दिनकरस्य दिनेऽथ मासे॥ ३॥ व्याप्तं नभः प्रचलिताचलसन्निकाशैर्व्यालाञ्जनालिगवलच्छविभिः पयोदैः। गां पूरयद्भिरखिलाममलाभिरद्भिरुत्कण्ठकेन गुरुणा ध्वनितेन चाशाः॥ ४॥ तोयानि पद्मकुमुदोत्पलवन्त्यतीव फुल्लद्रुमाण्युपवनान्यलिनादितानि। गावः प्रभूतपयसो नयनाभिरामा रामा रतैरविरतं रमयंति रामान्॥ ५॥ गोधूमशालियवधान्य-

---

यदि सूर्य वर्षका स्वामी, मासका स्वामी, दिनका स्वामी हो तौ सब जगह पृथ्वीपर धान्य थोडा हो, वनमें जगह २ वृक्षोंमें कीडे लग जाँय, नदियोंमें बहुतसा जल न रहे, मारे पीडाके औषधियोंमें अत्यन्त बल न रहे, शीतकालमेंभी सूर्य तीक्ष्ण धूप करे, पर्वतके समान मेघगण अधिक जल नहीं वर्षावें, आकाशमें चंद्रमा और तारोंकी दीप्ति जाति रहे, गाय और तपस्वी कुलको शोक हो, हाथी, घोडे, पदातिकरूप सहनीय बलयुक्त राजा लोग बहुतसे बाण, धनु, असि और मुसल लेकर अपने अनुचरोंको साथ ले युद्ध करके समस्त देशोंको ध्वंस करते हुए घूमें॥ १॥ ॥ २॥ ३॥ जो चंद्रमा वर्षका मालिक हो तौ चलायमान पर्वतकी समान काले सर्प अञ्जन, भ्रमर और महिषीकी नाईं काली द्युतिवाले मेघवृन्द आकाशको व्याप्त करते हैं. उत्कण्ठासूचक भारी शब्द करके समस्त दिशाओंको पूर्ण करते हुए अमल जलसे पृथ्वीको पूर्ण करते हैं; सरोवरोंमें, कमल बबूले और उत्पल फूल जाते हैं; उपवन (बाग) प्रफुल्ल वृक्षयुक्त और भ्रमरोंके शब्दसे शब्दायमान होते हैं; गाय दूध बहुतसा देती हैं; नेत्रोंको आनंद देनेवाली स्त्रियां आसक्तिसे अविरत पुरुषोंको रमण कराती हैं; ईख, शाली, जौ, धान्य श्रेष्ठ और युक्त समूह समृद्धियुक्त चैत्य अर्थात् छोटे २ देवमंदिरोंसे अंकित और यज्ञ व होमके पवित्र शब्दसे

वरेक्षुपाटा भूः पाल्यते नृपतिभिर्नगराकराढ्या। चित्याङ्किता क्रतुवरेष्टिविघुष्टनादा संवत्सरे शिशिरगोरभिसम्प्रवृत्ते ॥ ६ ॥ वातोद्धतश्चरति वह्निरतिप्रचण्डो ग्रामान् वनानि नगराणि च सन्दिधक्षुः। हाहेति दस्युगणपातहता रटन्ति निःस्वीकृता विपशवो भुवि मर्त्यसङ्घाः ॥ ७ ॥ अभ्युन्नता वियति संहतमूर्तयोऽपि मुञ्चन्ति न क्वचिदपः प्रचुरं पयोदाः। सीम्नि प्रजा तमपि शोषमुपैति सस्यं निष्पन्नमप्यविनयादपरे हरन्ति ॥ ८ ॥ भूपा न सम्यगभिपालनसक्तचित्ताः पित्तोत्थरुग्बहुलता भुजगप्रकोपः। एवंविधैरुपहता भवति प्रजेयं संवत्सरेऽवनिसुतस्य विपन्नसस्या ॥ ९ ॥ मायेन्द्रजालकुहकाकरनागराणां गान्धर्वलेख्यगणितास्त्रविदां च वृद्धिः। पिप्रीषया नृपतयोऽद्भुतदर्शनानि दित्सन्ति तुष्टिजननानि परस्परेभ्यः ॥ १० ॥ वार्ता जगत्यवितथाविकला त्रयी च सम्यक् चरत्यपि मनोरिव दण्डनीतिः। अध्यक्षरं स्वभिनिविष्टधियोऽत्र केचिदान्वीक्षिकीषु च परं पदमीहमानाः ॥ ११ ॥ हास्यज्ञदूतकविबालनपुंसकानां युक्तिज्ञसेतु-

---

शब्दायमान होकर पृथ्वी राजाओंसे पाली जाती है ॥ ४ ॥ ५ ॥ ६ ॥ मंगल वर्षका स्वामी हो तो वायुसे उठी हुई अतिप्रचंड अग्नि ग्राम, वन और नगरोंको जलानेकी इच्छा करती है; पृथ्वीके मनुष्य चोरोंसे मार डाले जाकर सहायहीन और पशुहीन होकर हाहाकार करते हुए विचरण करते हैं; मेघकुल शून्यमें कम ऊंचा और संहत मूर्ति होकरभी कहीं बहुतसा जल नहीं वर्षाते; पका हुआ धान्य लगभग सूखही जाता है और किसी प्रकारसे निवटकरभी अविनयके हेतुसे दूसरे आदमी उसको हरण कर लेते हैं. मंगलके संवत्सरमें राजालोग भलीभांतिसे प्रजाको नहीं पालते, पित्तसे उत्पन्न हुए रोगोंकी अधिकता होती है. सर्पोंका कोप होता है. इस प्रकार प्रजाके लोग विना नाजके दीन हीन और मृतवत्‌ हो जाते हैं ॥ ७ ॥ ८ ॥ ९ ॥ बुध वर्षका स्वामी हो तो माया, इन्द्रजाल और भानमती करनेवाले मनुष्य और गंधर्व, लेख्य, गणित व अस्त्र जाननेवालोंकी वृद्धि होती है; राजालोग प्रीतिकी कामनासे अद्भुतदर्शन और तुष्टिकर द्रव्य, परस्पर एक दूसरेको दान करनेकी इच्छा करते हैं; जगत्‌में वार्ता और त्रयी शास्त्र अविकल और सत्य रहता है; मनुकी समान दंडनीति भली भांतिसे विराजमान रहती है; कोई शास्त्रज्ञानमें अपनी बुद्धिको लगाता है, कोई २ आन्वीक्षिकी शास्त्रसे परम पदके पानेकी चेष्टा करता है; बुधग्रह अपने वर्षमें अथवा मासमें इस प्रकारसे पृथिवीको हास्यज्ञ,

जलपर्वतवासिनां च । हार्दिं करोति मृगलाञ्छनजः स्वकेऽब्दे मासेऽथ वा प्रचु-
रतां भुवि चौषधीनाम् ॥ १२ ॥ ध्वनिरुच्चरितोऽध्वरे द्युगामी विपुलो यज्ञमुषां
मनांसि भिन्दन् । विचरत्यनिशं द्विजोत्तमानां हृदयानन्दकरोऽध्वरांशभाजाम्
॥ १३ ॥ क्षितिरुत्तमसस्यवत्यनेकद्विपपत्त्यश्वधनोरुगोकुलाढ्या । क्षितिपैरभिपा-
लनप्रवृद्धा द्युचरस्पर्द्धिजना तदा विभाति ॥ १४ ॥ विविधैर्वियदुन्नतैः पयोदैः
तसुर्वीं पयसाभितर्पयद्भिः । सुरराजगुरोः शुभेऽत्र वर्षे बहुसस्या क्षितिरुत्त-
र्द्धियुक्ता ॥ १५ ॥ शालीक्षुमत्यपि धरा धरणीधराभधाराधरोज्झितपयःपरि-
पूर्णवप्रा । श्रीमत्सरोरुहततताम्बुतडागकीर्णा योषेव भात्यभिनवाभरणोज्ज्व-
लाङ्गी ॥ १६ ॥ क्षत्रं क्षितौ क्षपितभूरिबलारिपक्षमुद्घष्टनैकजयशब्दविराविता-
शम् । संहृष्टशिष्टजनदुष्टविनष्टवर्गं गां पालयन्त्यवनिपा नगराकराढ्याम् ॥१७॥
पेपीयते मधु मधौ सह कामिनीभिर्जेगीयते श्रवणहारि सवेणुवीणम् । बोभुज्य-

दूत, कवि, बालक, नपुंसक, युक्तिके जाननेवाले, सेतु, जल और पर्वतवासियोंको
तृप्ति करता है और पृथ्वीपर औषधियां बहुतायतसे होती हैं ॥ १० ॥ ११ ॥
॥ १२ ॥ बृहस्पति वर्षका स्वामी हो तो यज्ञमें उच्चारण की हुई विपुल आकाश-
गामी वेदध्वनि, यज्ञध्वंस करनेवालोंके मनको विदीर्ण कर श्रेष्ठ ब्राह्मणोंके और
यज्ञांश भागियोंके हृदयको आनंद कराकर भ्रमण करती हैं; उत्तम सस्यवती और
अनेक हस्ती, घोडे, चतुरंगसेना, महाधन, गोकुल और धनयुक्त पृथ्वी राजाओंसे
पाली जाकर और वर्धित होकर मानो स्वर्गवासियोंकी समान स्पर्द्धा करनेवालोंके
साथ विराजमान होती है; आसमानी पानीसे तृप्तिकारक विविध रंगके बादल
पृथ्वीको ढक लेते हैं. इन देवनानाथके गुरु बृहस्पतिजीके शुभवर्षमें इस प्रकार
पृथ्वी बहुतसे धान्यशाली और ऋद्धियुक्त होती है ॥ १३ ॥ १४ ॥ १५ ॥ बृहस्पति
वर्षका स्वामी हो तो पर्वताकार बादलों करके छोडे हुए जलसे परिपूर्ण हुए
सुन्दर कमलोंसे जिनका जल ढका हुआ है ऐसे तडागोंसे आकीर्ण होकर नये
गहनोंसे सजी हुई उज्ज्वल अंगवाली नारीकी समान शोभा पाती है, और
ईख पैदा करती है; शत्रुओंको क्षय करनेवाले और पोषण करते हुए जयशब्दसे
दिशाओंको शब्दायमान करते हुए राजालोग शिष्ट जनोंको संतोष और दुष्टोंका
नाश करके नगर व खानिके सहित ऋद्धिशाली पृथ्वीका पालन करते हैं, वसन्त
ऋतुमें मनुष्यगण कामिनियोंके साथ बारंबार मधुपान करके वेणुवीणाके साथ
[illegible] कर गान किया करते हैं और अनिवे सुहृद व भार्य[illegible]

तेऽतिथिसुहृत्स्वजनैः सहान्नमब्दे सितस्य मदनस्य जयावघोषः ॥ १८ ॥ उद्वृत्तदस्युगणभूरिरणाकुलानि राष्ट्राण्यनेकपशुवित्तविनाकृतानि । रोरूयमाणहतबन्धुजनैर्जनैश्च रोगोत्तमाकुलकुलानि बुभुक्षया च ॥ १९ ॥ वातोद्धताम्बुधरवर्जितमन्तरिक्षमारुग्णनैकविटपं च धरातलं द्यौः । नष्टार्कचन्द्रकिरणातिरजोऽवनद्धा तोयाशयाश्च विजलाः सरितोऽपि तन्व्यः ॥ २० ॥ जातानि कुत्रचिदतोयतया विनाशमृच्छन्ति पुष्टिमपराणि जलोक्षितानि । सस्यानि मन्दमभिवर्षति वृत्रशत्रौ वर्षे दिवाकरसुतस्य सदा प्रवृत्ते ॥ २१ ॥ अणुरसद्मयूखो नीचगोऽन्यैर्जितो वा न सकलफलदाता पुष्टिदोऽनोऽन्यथा यः । यदशुभमशुभेऽब्दे मासजं तस्य वृद्धिः शुभफलमपि चैवं याप्यमन्योऽन्यतायाम् ॥२२॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां ग्रहवर्षफलमेकोनविंशोऽध्यायः ॥१९॥

साथ अन्नभोजन किया करते हैं, शुक्रके वर्षमें इस प्रकारसे कामदेवकी जय हुआ करती है ॥ १६ ॥ १७ ॥ १८ ॥ जब शनि वर्षका स्वामी होता है तब खोटे मनवाले चोर और बहुतसे संग्रामोंके होनेसे समस्त राज्य आकुल होते हैं; पशुओंका पशु धन जाता रहता है; बन्धुओंका वियोग होनेसे मनुष्यगण बहुतही रोते हैं; क्षुधाके मारे और रोगोंके मारे बहुतही व्याकुल होते हैं; आकाशमें जैसेही बादल आते हैं वैसेही पवन उनको उडा देता है, पृथ्वीपर एक पत्ताभी तो आरोग्य नहीं रहता, आकाशमें सूर्य चन्द्रमाकी किरणें धूरीसे बन्ध जाती हैं; जलाशय जलहीन और नदियां कृशांग हो जाती हैं; कहीं पर नाज जलके अभावसे नष्ट हो जाता है; कहीं जल भरी हुई भूमिमें पल जाता है । इस प्रकार जिस वर्षमें शनि स्वामी होता है तब इन्द्र मन्द मन्द धान्यका देनेवाला जल वर्षाता है ॥ १९ ॥ २० ॥ २१ ॥ जो ग्रह क्षुद्र, अपटुकिरण, नीचगामी या किसीसे विजित हो जाता है, वह समस्त फलका दाता और पुष्टिकारी नहीं हो सकता । जो अशुभ ग्रह वर्षका स्वामी या मासका स्वामी होता है तो उसके मासमें उत्पन्न हुए फलकी प्राप्ति होती है अन्यथा होवे तो शुभ फलभी प्राप्त हो जाता है ॥ २२ ॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां [illegible]
[illegible]

अथ विंशोऽध्यायः ।

ग्रहशृङ्गाटक.

यस्यां दिशि दृश्यन्ते विशन्ति तारग्रहा रविं सर्वे । भवति भयं दिशि तस्या-मायुधकोपक्षुधातङ्कैः ॥ १ ॥ चक्रधनुःशृङ्गाटकदण्डपुरप्रासवज्रसंस्थानाः । क्षुदवृष्टिकरा लोके समराय च मानवेन्द्राणाम् ॥ २ ॥ यस्मिन्नंशे दृष्टा ग्रहमाला दिनकरे दिनान्तगते । तत्रान्यो भवति नृपः परचक्रोपद्रवश्च महान् ॥ ३ ॥ यस्मिन्नृक्षे कुर्युः समागमं तज्जनान् ग्रहा हन्युः । अविभेदनाः परस्परममलमयूखा शिवास्तेषाम् ॥ ४ ॥ ग्रहसंवर्तसमागमसम्मोहसमाजसन्निपातास्त्याः । कोशश्चेत्येषामभिधास्ये लक्षणं सफलम् ॥ ५ ॥ एकर्क्षे चत्वारः सह परियान्तिनोऽथवा पञ्च । संवर्तो नाम भवेच्छिखिराहुयुतः स सम्मोहः ॥ ६ ॥ पौरः पौरसमेतो यायी सह यायिना समाजाख्यः । यमजीवसङ्गमेऽन्यो यद्यास्योदयो कोशः ॥ ७ ॥ उदितः पश्चादेकः प्राक् चान्यो यदि स सन्निपाताख्यः

जिस दिशामें तारागृह सूर्यमें प्रवेश करते हुए देखे जाते हैं; उसी दिशाके [illegible] शस्त्रकोप, क्षुधा और आतंकसे भय होता है ॥ १ ॥ ग्रहसंस्थान या चक्र, धनु, शृंगाटक (चतुष्पथ), दण्डपुर, प्रास या वज्रकी समान दिखाई दे तो [illegible] क्षुधा, अवृष्टि और राजाओंका समर हुआ करता है ॥ २ ॥ सूर्यके [illegible] दिनके अन्तमें चले जाने पर जिस देशके आकाशके अंशमें ग्रहमाला दिखाई दे वहांपर दूसरे राजाका अधिकार होता है और परचक्रका महान उपद्रव होता है ॥ ३ ॥ जिस नक्षत्रमें ग्रह आया करते हैं, उस नक्षत्रके वशीभूत मनुष्य [illegible] करते हैं. परस्पर वर्जित विभेदन और निर्मल किरण होनेपर वहांके मनुष्य [illegible] होते हैं ॥ ४ ॥ ग्रहोंका संवर्त, समागम, सम्मोह, समाज, सन्निपात और [illegible] हुआ करता है इन सबके सफल लक्षण कहे जाते हैं ॥ ५ ॥ एक नक्षत्रमें [illegible] साथ चार या पांच [illegible] ग्रहोंके मिलनेसे [illegible] है. [illegible] सम्मोह कहलाता है ॥ ६ ॥ पौरके साथ पौर [illegible] [illegible] समाज नाम होता है [illegible] संगममें यदि कोई और ग्रह आ जाय तो वह [illegible] ॥ ७ ॥ यदि पश्चिममें एक और पूर्वमें दूसरा उदय हो तो उसे

अविकृततनवः स्निग्धा विपुलाश्च समागमे धन्याः ॥ ८ ॥ समौ तु संवर्तसमागमाख्यौ सम्मोहकोशौ भयदौ प्रजानाम् । समाजसंज्ञः सुसमः प्रदिष्टो वैरप्रकोपः खलु सन्निपाते ॥ ९ ॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां ग्रहशृङ्गाटकं नाम विंशतितमोऽध्यायः ॥ २० ॥

अथैकविंशोऽध्यायः ।

गर्भलक्षण.

अन्नं जगतः प्राणाः प्रावृट्कालस्य चान्नमायत्तम् । यस्मादतः परीक्ष्यः प्रावृट्कालः प्रयत्नेन ॥ १ ॥ तल्लक्षणानि मुनिभिर्यानि निबद्धानि तानि दृष्ट्वेदम् । क्रियते गर्गपराशरकाश्यपवात्स्यादिरचितानि ॥ २ ॥ दैवविदवहितचित्तो द्युनिशं यो गर्भलक्षणे भवति । तस्य मुनेरिव वाणी न भवति मिथ्याम्बुनिर्देशे ॥ ३ ॥ किं वातः परमन्यच्छास्त्रं ज्यायोऽस्ति यद्विदित्वैव । प्रध्वंसिन्यपि

सन्निपात कहते हैं; समागममें अर्थात् चंद्रमाके मिलनमें ग्रहगण विकाररहित, स्निग्ध, विपुल और धन्य होते हैं ॥ ८ ॥ संवर्त और समागमका फल समता है; सम्मोह और कोशमें प्रजाओंको भय होता है; समाज संज्ञामें उत्तम समता और सन्निपातमें वैर और कोप होता है ॥ ९ ॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां भाषाटीकायां विंशोऽध्यायः ॥ २० ॥

अन्नही जगत्का प्राण है और अन्नही वर्षाकालके वशमें है इस कारण इस करके यत्नके सहित वर्षाकालकी परीक्षा करनी चाहिये ॥ १ ॥ मैंने गर्ग, पराशर, काश्यप और वात्स्यादि मुनियोंके द्वारा रचे हुए और बांधे हुए ग्रंथोंके लक्षण देखकर यह गर्भलक्षण बनाया है ॥ २ ॥ जो दैवका जाननेवाला पुरुष रात दिन गर्भलक्षणमें मन लगाय सावधान चित्तसे रहते हैं, उनके वाक्य मुनियोंके समान मेघगणितमें कभी मिथ्या नहीं होते ॥ ३ ॥ इससे कौनसा श्रेष्ठ शास्त्र है, जो कि जिस श्रेष्ठ शास्त्रको जानकर विध्वंसी कलिकालमेंभी लोग [illegible] दर्शी होते

स्निग्धाः । परिवेषाश्वासकलाः कपिलस्ताम्रो रविश्च शुभः ॥ २१ ॥ पवनघनवृ
ष्टियुक्ताश्चैत्रे गर्भाः शुभाः सपरिवेषाः । घनपवनसलिलविद्युत्स्तनितैश्च हिता
वैशाखे ॥ २२ ॥ मुक्तारजतनिकाशास्तमालनीलोत्पलाञ्जनाभासः । जलचरस
त्वाकारा गर्भेषु घनाः प्रभूतजलाः ॥ २३ ॥ तीव्रदिवाकरकिरणाभितापि
मन्दमारुता जलदाः । रुषिता इव धाराभिर्विसृजन्त्यम्भः प्रसवकाले ॥ २४ ॥
गर्भोपघातलिङ्गान्युल्काशनिपांशुपातदिग्दाहाः । क्षितिकम्पखपुरकीलककेतुग्र
हयुद्धनिर्घाताः ॥ २५ ॥ रुधिरादिवृष्टिवैकृतपरिघेन्द्रधनूंषि दर्शनं राहोः । इत्यु
त्पातैरेभिस्त्रिविधैश्चान्यैर्हतो गर्भः ॥ २६ ॥ स्वर्तुस्वभावजनितैः सामान्यैर्य
लक्षणैर्वृद्धिः । गर्भाणां विपरीतैस्तैरेव विपर्ययो भवति ॥ २७ ॥ भाद्रपदाद्व
विश्वाम्बुदेवपैतामहेष्वथर्क्षेषु । सर्वेष्वृतुषु विवृद्धो गर्भो बहुतोयदो भवति॥२८
शतभिषगाश्लेषार्द्रास्वातिमघासंयुतः शुभो गर्भः । पुष्णाति बहून्दिवसान् हन्त्यु
त्पातैर्हतस्त्रिविधैः ॥ २९ ॥ मृगमासादिष्वष्टौ षट् षोडश विंशतिश्चतुर्युक्ता

ताम्रवर्ण हो तो शुभ होता है ॥ २१ ॥ यदि चैत्रमें सब गर्भ पवन, मेघ, वृष्टि
और परिवेषयुक्त हो तो शुभ है । जो वैशाखमें मेघ, वायु, जल और शब्दायमा
मिजलीसे युक्त हो तो गर्भसे हितसाधन होता है ॥२२॥ मोती या चांदीकी सम
वा तमाल, नील उत्पल और अंजनकी द्युतिके समान या जलचर प्राणियों
समान आकारवाले मेघ बहुतसा जल वर्षावें और सूर्यकी किरणसे गर्भ तपे और मं
पवनके चलनेसे बादल प्रसवकालमें मानो रुपित होकर जलधारा वर्षावे ॥ २३ ॥२४
उल्का, वज्र, धूलिका गिरना, दिग्दाह, भोंचाल, गन्धर्वनगर, कीलक, केतु, ग्रहयु
निर्घात, रुधिरादिके वर्षनेमें विकारपन, परिघ, इन्द्रधनुष, राहुदर्शन इन सब उत्प
तोंसे व और तीन उत्पातोंसे गर्भका नाश हो जाता है ॥ २५ ॥ २६ ॥ अप
स्वभावसे साधारण लक्षणद्वारा जो गर्भ बढते हैं; उनके विपरीत लक्षणोंसे उन
नाश हो जाता है ॥ २७ ॥ सब ऋतुओंमेंही पूर्वाभाद्रपदा, उत्तराभाद्रपदा, पू
षाढा, उत्तराषाढा और रोहिणीनक्षत्रमें बढे हुए गर्भ बहुतसा जल देते हैं ॥ २८
शतभिषा, आश्लेषा, आर्द्रा, स्वाति और मघासंयुक्त गर्भ शुभदायी और ब
दिनतक पोषण करते हैं, तीन उत्पातोंसे हने हुए हों तो हनन करते हैं ॥ २९
जब चंद्रमा इन पांच नक्षत्रोंमेंसे किसी एक नक्षत्रमें रहता है तब अपरान
वैसेसरह छः मासमें क्रमानुसार ८।६।१६।२४।२० और तीन दिनतक व

विंशतिरथ दिवसत्रयमेकतमर्क्षेण पञ्चभ्यः ॥ ३० ॥ क्रूरग्रहसंयुक्तेः करकाश-
निमत्स्यवर्षदा गर्भाः । शशिनि रवौ वा शुभसंयुतेक्षिते भूरिवृष्टिकराः ॥ ३१ ॥
गर्भसमयेऽतिवृष्टिर्गर्भाभावाय निर्निमित्तकृता । द्रोणाष्टांशेऽभ्यधिके वृष्टे गर्भः
स्रुतो भवति ॥ ३२ ॥ गर्भः पुष्टः प्रसवे ग्रहोपघातादिभिर्यदि न वृष्टः । आत्मी-
यगर्भसमये करकामिश्रं ददात्यम्भः ॥ ३३ ॥ काठिन्यं याति यथा चिरकाल-
धृतं पयः पयस्विन्याः । कालातीतं तद्वत्सलिलं काठिन्यमुपयाति ॥ ३४ ॥
पञ्चनिमित्तैः शतयोजनं तदर्धार्धमेकहान्यातः । वर्षति पञ्च समन्तात्रूपेणैव यो
गर्भः ॥ ३५ ॥ द्रोणः पञ्चनिमित्ते गर्भे त्रीण्याढकानि पवनेन । षड् विद्युता
नवाभ्रैः स्तनितेन द्वादश प्रसवे ॥ ३६ ॥ पवनसलिलविद्युद्गर्जिताभ्रान्वितो यः
स भवति बहुतोयः पञ्चरूपाभ्युपेतः । विसृजति यदि तोयं गर्भकालेऽतिभूरि
प्रसवसमयमित्वा शीकराम्भः करोति ॥ ३७ ॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां गर्भलक्षणमेकविंशोऽध्यायः ॥ २१ ॥

पर वर्षा हुआ करती है ॥ ३० ॥ क्रूरग्रहसंयुक्त होनेपर समस्त गर्भ ओले, अशनि और मछली वर्षाया करते हैं और चंद्रमा या सूर्य शुभग्रहयुक्त या शुभग्रहसे देखे जानेपर बहुतही वर्षा करते हैं ॥ ३१ ॥ यदि गर्भसमयमें अकारणही बहुतसी वर्षा होवे तो गर्भका अभाव होता है, द्रोणके अष्टांशसेभी अधिक वर्षण करनेपर गर्भ नष्ट हो जाता है ॥ ३२ ॥ जो पुष्टगर्भ ग्रहोपघातादिसे न वर्षे तो प्रसवकालमें आत्मीय गर्भके समय ओलेका मिला हुआ जल वर्षाते हैं ॥ ३३ ॥ जिस प्रकार गायोंका बहुत कालतक धरा हुआ दूध कड़ेपनको प्राप्त हो जाता है, वैसेही गर्भ अनेक दिन बीतनेपर कठिनताको प्राप्त हो जाता है ॥ ३४ ॥ जो गर्भ पांच प्रकारके निमित्तसे पुष्ट होता है वह गर्भ शतयोजनतक फैलकर वर्षा करता है, उनमें एक २ निमित्तके अभावमें शत योजनके अर्द्धार्द्धकी हानि होकर वर्षा होती है ॥ ३५ ॥ अर्थात् चतुर्निमित्तक गर्भ ५० योजन (२०० कोश), त्रिनिमित्तक २५ योजन (१०० कोश), द्विनिमित्तक १२॥ योजन (५० कोश) और एक निमित्तकगर्भ ५ योजन (२० कोश) तक जल वर्षता है. पांचनिमित्तकगर्भ एक द्रोणजल वर्षाता है, पवननिमित्तक तीन (३) आढक और विद्युन्निमित्तक ६ आढक जल वर्षाता है ॥ ३६ ॥ जो गर्भ पवन, जल, बिजली, [illegible]

अथ द्वाविंशोऽध्यायः।

गर्भधारण.

ज्येष्ठसितेऽष्टम्याद्याश्चत्वारो वायुधारणादिवसाः । मृदुशुभपवनाः शस्ताः स्निग्धघनस्थगितगगनाश्च ॥ १ ॥ तत्रैव स्वात्याद्ये वृष्टे भचतुष्टये क्रमान्मासाः। श्रावणपूर्वा ज्ञेयाः परिस्रुता धारणास्ताः स्युः ॥ २ ॥ यदि ताः स्युरेकरूपाः शुभास्ततः सान्तरास्तु न शिवाय । तस्करभयदाः प्रोक्ताः श्लोकाश्चाप्यत्र वासिष्ठाः ॥ ३ ॥ सविद्युतः सपृषतः सपांशूत्करमारुताः । सार्कचन्द्रपरिच्छन्ना धारणाः शुभधारणाः ॥ ४ ॥ यदा तु विद्युतः श्रेष्ठाः शुभाशासंस्थपरिस्थिताः। तदापि सर्वसस्यानां वृद्धिं ब्रूयाद्विचक्षणः ॥ ५ ॥ सपांशुवर्षाः सापश्च शुभा बालक्रिया अपि। पक्षिणां सुस्वरा वाचः क्रीडा पांशुजलादिषु ॥ ६ ॥ रविचन्द्रपरिवेषाः स्निग्धा नात्यन्तदूषिताः । वृष्टिस्तदापि विज्ञेया सर्वसस्याभि-

रूप पंचानिमित्तयुक्त है सो बहुतसा जल देता है; यदि गर्भकालमें बहुतसा जल वर्षे तौ प्रसवकालको लांघकर जलकण वर्षा करते हैं ॥ ३७ ॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य–पंडितबलदेवप्रसादमिश्रविरचितायां भाषाटीकायामेकविंशोऽध्यायः ॥ २१ ॥

ज्येष्ठमासके शुक्लपक्षकी अष्टमी आदिको चार दिनतक वायुसे गर्भधारणजान होनेके दिन हैं। सो मृदु शुभ वायुयुक्त होनेपर या चिकने मेघसे ढके हुए बादलके होनेपर श्रेष्ठ है ॥ १ ॥ तिसमें स्वाति आदि चार नक्षत्रोंके वर्षा हो तौ क्रमसे श्रावणादि महीनेमें गर्भधारण परिस्रुत जानना अर्थात् वर्षा न होगी ॥ २ ॥ यदि यह चारों दिन एकसे हों तौ शुभ होता है, जो इससे विपरीत हो तौ मंगलदायी नहीं होते; वरन तस्करोंका भय होता है। वसिष्ठजीके कहे हुए श्लोक इस विषयमें कहे हैं यथा ॥ ३ ॥ दामिनी, जलकण और धूरि मिला हुआ पवन चले, चन्द्रमा या सूर्यका मेघोंसे ढके रहना इस प्रकारका जो गर्भ धारण है सो श्रेष्ठ है ॥ ४ ॥ जिस समय श्रेष्ठ बिजली शुभ दिशाओंमें दमके तब बुद्धिमान् पुरुषको जानना चाहिये कि धान्यकी वृद्धि होगी ॥ ५ ॥ जो बालक खेलते २ जल या धूरिको वर्षावें या पक्षियोंका मधुर २ शब्द हों; पक्षी जलादिमें किलोलें करें तो शुभ होता है ॥ ६ ॥ चन्द्रमा सूर्यके मण्डल स्निग्ध है और अत्यन्त दूषित नहीं हो तौ तिस कालमें

द्धचे ॥ ७ ॥ मेघाः स्निग्धाः संहताश्च प्रदक्षिणगतिक्रियाः । तदा स्यान्महती वृष्टिः सर्वसस्यार्थसाधिका ॥ ८ ॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां मेघगर्भधारणं नाम द्वाविंशोऽध्यायः ॥ २२ ॥

अथ त्रयोविंशोऽध्यायः ।

प्रवर्षण.

ज्येष्ठ्यां समतीतायां पूर्वाषाढादिसम्प्रवृष्टेन । शुभमशुभं वा वाच्यं परिमाणं चाम्भसस्तज्ज्ञैः ॥ १ ॥ हस्तविशालं कुण्डकमधिकृत्याम्बुप्रमाणनिर्देशः । पञ्चाशत्पलमाढकमनेन मिनुयाज्जलं पतितम् ॥ २ ॥ येन धरित्री मुद्रा जनिता वा बिन्दवस्तृणाग्रेषु । वृष्टेन तेन वाच्यं परिमाणं वारिणः प्रथमम् ॥ ३ ॥ केचिद्यथाभिवृष्टं दशयोजनमण्डलं वदन्त्यन्ये । गर्गवसिष्ठपराशरमतमेतद्द्वादशान्न

वर्षादी सब धान्योंको बढानेवाली है ॥ ७ ॥ मेघ चिकने, गाढे और प्रदक्षिण गतिसे परिक्रमा करते हुए चलते हों तो सर्व धान्य और अर्थकी साधन कर नेवाली बडी भारी वर्षा होती है ॥ ८ ॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबाद-वास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां भाषाटीकायां द्वाविंशोऽध्यायः ॥२२॥

ज्येष्ठके पूर्णिमाके भलीभांति वर्ष जानेपर यदि पूर्वाषाढादि नक्षत्रमें वर्षा हो तो जलका परिमाण और शुभाशुभ बुद्धिमानोंको कहना उचित है ॥ १ ॥ एक हाथ लम्बे और एक हाथ चौडे कुण्डको धारण करके जलका प्रमाण कहना चाहिये, यह पानीसे भर जाय तो उस वर्षे हुए जलको तोलकर वर्षाका परिमाण कहे । उक्त पात्रका परिमाण पचास पल है । यह जलसे भर जाय तौ वर्षे हुए जलका परिमाण एक आढक होता है ॥ २ ॥ जिसके गिरनेसे पृथ्वीपर चिह्न पड जाय या तृणोंकी नोकोंपर पानीकी बूंदें टहर जांय, उस वर्षासेही जलका प्रथम परिमाण कहना चाहिये ॥ ३ ॥ कोई २ कहते हैं; कि जहांतक देखा जाय तहांहीतक वर्षा होती है; कोई २ ऊपर कहे हुए लक्षणसे दश योजन मण्डलमें वर्षाका होना कहते हैं, परन्तु गर्ग, वसिष्ठ और पराशरके मतसे बारह योजन अर्थात् ४८ कोशके आगे

परम् ॥ ४ ॥ येषु च भेष्वभिवृष्टं भूयस्तेष्वेव वर्षति प्रायः । यदि नाप्याद्यिवृष्टं सर्वेषु तदा त्वनावृष्टिः ॥ ५ ॥ हस्ताप्यसौम्यचित्रापौष्णधनिष्ठासु षोडश द्रोणाः । शतभिषगैन्द्रस्वातिषु चत्वारः कृत्तिकासु दश ॥ ६ ॥ श्रवणे मघानुराधाभरणीमूलेषु दश चतुर्युक्ताः । फल्गुन्यां पञ्चकृतिः पुनर्वसौ विंशतिर्द्रोणाः ॥७॥ ऐन्द्राग्नाख्ये वैश्वे विंशतिः सार्पभे च दश त्र्यधिकाः । आहिर्बुध्न्यार्यम्णप्राजापत्येषु पञ्चकृतिः ॥ ८ ॥ पञ्चदशाजे पुष्ये कीर्तिता च वाजिभे दश द्वे च । रौद्रेऽष्टादश कथिता द्रोणा निरुपद्रवेष्वेषु ॥ ९ ॥ रविरविसुतकेतुपीडिते भे क्षितितनयत्रिविधाद्भुताहते च । भवति हि न शिवं न चापि वृष्टिः शुभसहिते निरुपद्रवे शिवं च ॥ १० ॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां प्रवर्षणं नाम त्रयोविंशोऽध्यायः॥२३॥

वर्षा नहीं होती ॥ ४ ॥ जिन नक्षत्रोंमें वर्षा होती है; बहुधा प्रसवकालके समय उन्हीं सब नक्षत्रोंमें वर्षा हुआ करती है, परन्तु यदि पूर्वाषाढासे लेकर मूलनक्षत्रतक किसी नक्षत्रमें वर्षा न हो तौ सब नक्षत्रोंमें अनावृष्टि होती है ॥५॥ जो उपद्रवहीन चंद्रमा हस्त, पूर्वाषाढा, मृगशिर, चित्रा, रेवती और धनिष्ठामें हो तौ सोलह द्रोण, शतभिषा, ज्येष्ठा और स्वातीमें ४ द्रोण, कृत्तिकामें १० दश, श्रवण, मघा, अनुराधा, भरणी और मूलमें चतुर्दश, फाल्गुनीमें पचीस, पुनर्वसुमें २० बीस, विशाखा और उत्तराषाढा नक्षत्रमें बीस, आश्लेषा नक्षत्रमें तेरह, उत्तराभाद्रपदा, उत्तराफाल्गुनी और रोहिणीमें पचीस, पूर्वाभाद्रपदा, पुष्य और अश्विनी नक्षत्रमें बारह और आर्द्रामें अठारह द्रोण जल वर्षाता है ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ यदि सब नक्षत्र सूर्य, शनि वा केतुसे पीडित हों और मंगल करके त्रिविध अद्भुतद्वारा आहत हों तौ वर्षा नहीं होती; परन्तु शुभके साथ निरुपद्रव होनेपर शुभ होता है ॥ १० ॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां भाषाटीकायां त्रयोविंशोऽध्यायः ॥ २३ ॥

अथ चतुर्विंशोऽध्यायः।

रोहिणीयोग.

कनकशिलाचयविवरजतरुकुसुमासक्तमधुकरानुरुते। बहुविहगकलहसुरयुवतिगीतमन्द्रस्वनोपवने॥ १॥ सुरनिलयशिखरिशिखरे बृहस्पतिर्नारदाय यानाह। गर्गपराशरकाश्यपमयाश्च यान्शिष्यसङ्घेभ्यः॥ २॥ तानवलोक्य यथावद् प्राजापत्येन्दुसमयोगार्थान्। स्वल्पग्रन्थेनाहं तानेवाभ्युद्यतो वक्तुम्॥ ३॥ प्राजेशमाषाढतमिस्रपक्षे क्षपाकरेणोपगतं समीक्ष्य। वक्तव्यमिष्टं जगतोऽशुभं वा शास्त्रोपदेशाद्ग्रहचिन्तकेन॥ ४॥ योगो यथानागत एव वाच्यः स धिष्ण्ययोगः करणे मयोक्तः। चन्द्रप्रमाणद्युतिवर्णमार्गैरुत्पातपातैश्च फलं निगाद्यम्॥ ५॥ पुरादुदक्प्राक्पुरतोऽपि वा स्थलं ग्रहोषितस्तत्र हुताशतत्परः। ग्रहान् सनक्षत्रगणान् समालिखेद् सधूपपुष्पैर्बलिभिश्च पूजयेत्॥ ६॥ सरत्नतोयौषधिभिश्चतुर्दिशं तरुप्रवालापिहितैः सुपूजितैः। अकालमूलैः कलशै-

---

सुमेरुपर्वतके शिखरपर लगे हुए वृक्षोंके फूलोंपर आसक्त हुए भ्रमरोंके गुंजारसे, अनेक प्रकारके पक्षियोंकी चहचहारसे और देवाङ्गनाओंके मृदु गंभीर गीतोंके स्वरसे परिपूर्ण, पर्वतकी चोटीपर स्थित रमणीक उपवनोंमें बृहस्पतिजीने नारदजीसे जो रोहिणीयोग कहा था और गर्ग, पराशर, काश्यप ऋषियोंने और मयअसुरने अपने शिष्योंसे जो कहा था, तिसको देखकर इस छोटेसे ग्रंथमें उसही रोहिणी और चंद्रमाके योगका अर्थ यथार्थ २ वर्णन करनेको हम उत्साही हुए हैं॥१॥२॥॥ ३॥ आषाढ मासके कृष्णपक्षमें रोहिणीका चंद्रमाके साथ मेल देखकर जगत्का इष्ट या अनिष्ट शास्त्रके उपदेशानुसार दैवज्ञ कह सकता है॥४॥ मेल होनेसे पहलेही उनका योग जिस प्रकारसे होना चाहिये, करण (पंचसिद्धान्तिका) में वह धिष्ण्ययोग हमारे द्वारा कहा जा चुका है; चंद्रमाका प्रमाण, द्युति, वर्ण, मार्ग और उत्पातके द्वाराही फल कहना चाहिये॥ ५॥ ग्रहसंस्थानके जाननेवाले नगरकी पूर्व उत्तरदिशामें नक्षत्रसहित ग्रहोंको लिखकर धूप, फूल और बलिसे पूजा करे॥६॥ चारों ओरमें वृक्ष और कोंपलसे ढका हुआ रत्नसहित जल और औषधियुक्त, तिसकी तलीकामी न हो ऐसे पूजनीय कलशके द्वारा कुश बिछे हुए मंडपस्थानमें

रलंकृतं कुशास्तृतं स्थण्डिलमावसेद्विजः ॥ ७ ॥ आलभ्य मन्त्रेण महाव्रते
बीजानि सर्वाणि निधाय कुम्भे । प्लाव्यानि चामीकरदर्भतोयैर्होमो मरुद्वारुण
सौम्यमन्त्रैः ॥ ८ ॥ श्लक्ष्णां पताकामसितां विदध्याद्दण्डप्रमाणां त्रिगुणोच्छ्रि
च । आदौ कृते दिग्ग्रहणे नभस्वान् ग्राह्यस्तया योगगते शशाङ्के ॥ ९ ॥ तत्रा
र्धमासाः प्रहरैर्विकल्प्या वर्षानिमित्तं दिवसास्तदंशैः । सव्येन गच्छञ्छुभ
सदैव यस्मिन्प्रतिष्ठा बलवान् स वायुः ॥ १० ॥ वृद्धे तु योगेऽङ्कुरितानि या
सन्तीह बीजानि धृतानि कुम्भे । येषां तु योंऽशोऽङ्कुरितस्तदंशस्तेषां विवृ
समुपैति नान्यः ॥ ११ ॥ शान्तपक्षिमृगराविता दिशो निर्मलं वियदनिन्दित
ऽनिलः । शस्यते शशिनि रोहिणीयुते मेघमारुतफलानि वच्म्यतः ॥ १२
क्वचिदसितसितैः सितैः क्वचिच्च क्वचिदसितैर्भुजगैरिवाम्बुवाहैः । वलितजठर

ब्राह्मणको बैठना चाहिये ॥ ७ ॥ महाव्रत नामके मंत्रोंसे अभिमंत्रित कर स
मकारके बीज घडेमें डालकर सुवर्ण और दर्भयुक्त जलसे उसको प्लावित करे
मारुत, वरुण और सौम्य मंत्रसे होम करे ॥ ८ ॥ चन्द्रमाका योग होनेपर दंड
समान बारह हाथ ऊंचे बांसपर ४ हाथ लम्बी असित पताका धारण करे। प
दिन निर्णय करके उस पताकासे कितने क्षणतक कौन दिशामें हवा चलती है
जानें ॥ ९ ॥ एक प्रहरतक एक दिशामें हवा चले तो १५ दिनतक वर्षा होगी
इस प्रकार वायु वहनके कालसे दिवसके अंशको निर्णय करे (श्रावणसे कार्तिक
इन चार मासके आठ पक्षका एक २ पक्ष एक २ अंशसे निर्देश करना चाहिये
बायीं दिशामें वायु गमन करे तो शीघ्रही शुभदायी होती है और जो एक नि
लक्ष्यमें अर्थात् एक दिशामेंही गमन करे तो वह वायु प्रतिष्ठावान्
बलवान् होता है ॥ १० ॥ इस योगके चले जानेपर घडेमें धरे हुए बीजोंमें
जो अंकुरित हों, उनका वही २ अंशही वृद्धिको प्राप्त होगा; और अंश नहीं ॥ ११
रोहिणीके साथ चन्द्रमाका मेल होनेपर यदि सब दिशायें शान्त हो जांय, पक्षि
या मृगगण उनमें मनोहर शब्द करें, आकाश निर्मल और वायु आनंदित हो त
भूमिको श्रेष्ठ सिद्धि होती है। इसके उपरान्त मेघ मारुतके फल क्रमानुसार क
जाते हैं ॥ १२ ॥ आकाशमें कहीं काला, कहीं श्वेत, कहीं कृष्ण वर्ण, क
वलित, जठर, पृष्ठ मात्र दृश्य अर्थात् कुण्डली मारकर सर्पके मारनेसे जैसे तिरछे

उभावदृश्यैः स्फुरिततडिद्सनैवृत विशालैः ॥ १३ ॥ विकसितकमलोदरावदाते-रुणकरद्युतिरञ्जितोपकण्ठैः। छुरितमिव वियद्घनैर्विचित्रैर्मधुकरकुंकुमकिंशुकावदातैः ॥ १४ ॥ असितघननिरुद्धमेव वा चलिततडित्सुरचापचित्रितम् । द्विपमहिषकुलाकुलीकृतं वनमिव दावपरीतमम्बरम् ॥ १५ ॥ अथवाञ्जनशैलशिलानिचयप्रतिरूपधरैः स्थगितं गगनम् । हिममौक्तिकशंखशशाङ्ककरद्युतिहारिभिरम्बुधरैरथवा ॥ १६ ॥ तडिद्धेमकक्षैर्बलाकाग्रदन्तैः स्रवद्वारिदानैश्चलत्प्रान्तहस्तैः विचित्रेन्द्रचापध्वजोच्छ्रायशोभैस्तमालालिनीलैर्वृतं चाब्दनागैः ॥ १७॥ सन्ध्यानुरक्ते नभसि स्थितानामिन्दीवरश्यामरुचां घनानाम् । वृन्दानि पीताम्बरवेष्टितस्य कान्तिं हरेश्चोरयतां यदा वा ॥ १८ ॥ सशिखिचातकदर्दुरनिस्वनैर्यदि विमिश्रितमन्द्रपटुस्वनाः। स्वमवतत्य दिगन्तविलम्बिनः सलिलदाः सलिलौघमुचः क्षितौ ॥ १९॥ निगदितरूपैर्जलधरजालैर्त्र्यहमथ वत्र्यहमथवाहः । यदि वियदेवं भवति सुभिक्षं मुदितजना च प्रचुरजला भूः ॥ २० ॥

पीठ और पेट दीख पडती हो, चमकती हुई बिजलीकी समान जीभवाले और शब्दयुक्त विशाल भुजंगाकार मेघोंके द्वारा जो आकाश घिर जाय, खिले हुए कमलकी समान निर्मल व अरुण है समीपभाग जिनका, मधुकर, कुंकुम, टेसूके फूलकी समान निर्मल विचित्र मेघोंसे रंगनेकी समान जो आकाश शोभायमान हो, काले मेघोंसे रंगनेकी समान जो आकाश शोभायमान हो, काले मेघोंसे दबा हुआ हो या चमकती हुई बिजली और इन्द्रधनुषके द्वारा चित्रित आकाश मानो हाथी और भैंसोंके द्वारा आकुल किया हुआ दावानलयुक्त वनकी समान दिखलाई दे या अञ्जन पहाडके काले पत्थरोंकी समान मेघोंसे आकाश छा जाय, अथवा हिम, मुक्ता, शंख और चन्द्रकिरणोंकी ज्योति हरण करनेवाले बादलोंसे जो आकाशमण्डल ढक जाय या बिजलीरूप हैमवक्षासम्पन्न वायुका रूप अप्रदन्तरूप जलरूप मद चुआता प्रान्तरूप कर चलानेवाला, विचित्र इन्द्रका रूप ऊंची ध्वजासे शोभायमान और तमाल या भ्रमरकी समान नीलवर्ण हाथीरूप बादलने सब आकाश छा जाय; जो सांझके रागसे रंगे हुए आकाशमें स्थित नीले पद्मकी समान मेघवृंद पीतांबर पहरे हुए हरिकी कान्तिको हरण करे और मोर चातक व मेंढकोंके शब्दके साथ यदि मेघका गंभीर शब्द मिल जाय तो दिशाओंमें फैले हुए आकाशव्यापी बादल पृथ्वीपर बहुतसा जल बर्षाते हैं ॥१३॥१४॥१५॥१६॥१७॥१८॥१९ ॥ इस उक्त प्रकारके बादलोंसे आकाश दो या तीन दिन घिरे रहे तो सुभिक्ष होवे,

गच्छेत् कदाचिदनृषिर्मनसापि पारम् ॥ ४ ॥ होराशास्त्रेऽपि राशिहोराद्रेक्काणनवांशकद्वादशभागत्रिंशद्भागबलाबलपरिग्रहो ग्रहाणां दिक्स्थानकालचेष्टाभिरनेकप्रकारबलनिर्धारणं प्रकृतिधातुद्रव्यजातिचेष्टादिपरिग्रहो निषेकजन्मकालविस्मापनप्रत्ययादेशसद्योमरणायुर्दायदशान्तर्दशाष्टकवर्गराजयोगचन्द्रयोगद्विग्रहादियोगानां नाभसादीनाञ्च योगानां फलान्याश्रयभावावलोकननिर्याणगत्यनूकानि तात्कालिकप्रश्नशुभाशुभनिमित्तानि विवाहादीनाञ्च कर्म्मणां करणम् । यात्रायाञ्च तिथिदिवसकरणनक्षत्रमुहूर्तविलग्नयोगदेहस्पन्दनस्वप्नविजयस्नानग्रहयज्ञगणयागाग्निलिङ्गहस्त्यश्वेङ्गितसेनाप्रवादचेष्टादिग्रहषाड्गुण्योपायमंगलामङ्गलशकुनसैन्यनिवेशभूमयोऽग्निवर्णा मन्त्रिचरदूताटविकानां यथाकालं प्रयोगाः परदुर्गलम्भोपायोश्चत्युक्तं चाचार्यैः । जगति प्रसारितमिवालिखितमिव मतौ

तन्त्रको जानता हो, छाया, जल, यन्त्र आदि द्वारा लग्नको जान सकता हो और होराशास्त्रमें निपुण हो ऐसे पुरुषकी वाणी कदाचित् भी मिथ्या नहीं हो सकती । आर्य विष्णुगुप्तने कहाभी है–कि कदाचित् कोई पुरुष समुद्रको तैरकर पार होना चाहे तो वायुके वेगसे तैरकर पार हो सकता है परन्तु यह कालपुरुषका रूप जो ज्योतिष शास्त्र समुद्र है उसको ऋषिभिन्न मनुष्य मनसेभी पार नहीं हो सकता है । होरा शास्त्रमेंभी राशि, होरा, द्रेक्काण, नवांश, द्वादशांश, त्रिंशांश और बलाबल, परिग्रह, स्थान, काल और चेष्टा आदि अनेक प्रकारसे ग्रहबलका निर्द्धारण है; प्रकृति, धातु, द्रव्य, जाति और चेष्टा आदिका परिग्रह, निषेक, जन्मकाल, विस्मापन, प्रत्यय (विश्वास), आदेश, शीघ्रमरण, आयुर्दाय, दशा, अन्तर्दशा, अष्टवर्ग, राजयोग, चन्द्रयोग, द्विग्रहादियोग और नाभसादि सब योगोंका फल; आश्रय, भाव, दृष्टि, निर्याण, गति और अनूकादि व तित्त कालके सब प्रश्नोंका शुभाशुभ कारण, सबही विवाहादि कर्म्म समूहोंका हेतु, यात्राका वर्णन; तिथि, दिवस, करण, नक्षत्र मुहूर्त्त, लग्न, योग, शरीरके अंगोंका फडकना, स्वप्न, विजय, स्नान, ग्रहयज्ञ, गणयात्रा, अग्निलिंग, हाथी घोडेके संकेत, सेनापवादकी चेष्टा इत्यादि, षाड्गुण्य-उपाय, मंगल अमंगलके शकुन, सेनाके वास करनेकी भूमियें, अग्नियोंका वर्ण, मंत्री, चर, दूत और वनचारियोंका कालानुसार प्रयोग, परदुर्गोपालम्भका उपाय, सब यात्राओंका हेतु स्वरूप; यह सब बातें होराशास्त्रमें कही हैं । आचार्योंने कहा है; जगत्में प्रचार हुएकी समान, बुद्धिमें लिखे हुएकी समान, हृदयमें ढाले हुएकी समान भगणसहित शास्त्र अर्थात् इस ज्योतिषशास्त्रको जो भलीभांतिसे

निषिक्तमिव हृदये । शास्त्रं यस्य सभगणं नादेशा निष्फलास्तस्य ॥५॥ संहिता-
पारगश्च दैवचिन्तको भवति । यत्रैते संहितापदार्थाः । दिनकरादीनां ग्रहाणां चारा-
स्तेषु च तेषां प्रकृतिविकृतिप्रमाणवर्णकिरणद्युतिसंस्थानास्तमनोदयमार्गमार्गान्त-
रवक्रानुवक्रर्क्षग्रहसमागमचारादिभिः फलानि नक्षत्रकूर्मविभागेन देशेष्वगस्तिचारः
सप्तर्षिचारो ग्रहभक्तयो नक्षत्रव्यूहग्रहशृङ्गाटकग्रहयुद्धग्रहसमागमग्रहवर्षफलगर्भ-
लक्षणरोहिणीस्वात्याषाढीयोगाः सद्योवर्षकुसुमलतापरिधिपरिवेषपरिघपवनो-
ल्कादिग्दाहक्षितिचलनसन्ध्यारागगन्धर्वनगररजोनिर्घातार्घकाण्डसस्यजन्मेन्द्र-
ध्वजेन्द्रचापवास्तुविद्याङ्गविद्यावायसविद्यान्तरचक्रमृगचक्राश्वचक्रवातचक्रप्रा-
सादलक्षणप्रतिमालक्षणप्रतिष्ठापनवृक्षायुर्वेदोदगार्गलनीराजनखञ्जनोत्पातशान्ति-
मयूरचित्रकघृतकम्बलखड्गपट्टकृकवाकुकूर्मगोऽजाश्वेभपुरुषस्त्रीलक्षणान्यन्तःपु-
रचिन्तापिटकलक्षणोपानच्छेदवस्त्रच्छेदचामरदण्डशय्यासनलक्षणरत्नपरीक्षा दीप-

---

जानता है, उसका आदेश कभी निष्फल नहीं होता है ॥ ५ ॥ ज्योतिषशास्त्रके संहिताओंमें चतुर पुरुषही दैवज्ञ हो सकते हैं । क्योंकि संहिताओंमें इन सब बातोंका निरूपण होता है; यथा,-सूर्यादिग्रहकी चाल, तिनमें सूर्यादि सब ग्रहोंका स्वभाव, विकार, प्रमाण, वर्ण, किरण, ज्योति, संस्थान, उदय, अस्त, मार्ग, पृथक् मार्ग, वक्र, अनुवक्र और नक्षत्र, ग्रह, व समागमादिसे कालका निरूपण करना, नक्षत्रविभाग और कूर्मविभागसे सब देशोंमें उसका फल, अगस्त्यकी चाल, सप्तर्षियोंकी चाल, ग्रहभक्ति, नक्षत्रव्यूह, ग्रहशृंगाटक, ग्रहयुद्ध, ग्रहसमागम, ग्रहण, वर्षाका फल, गर्भलक्षण, रोहिणीयोग, स्वातीयोग, आषाढीयोग, शीघ्र वर्षाका होना, कुसुम, लता, परिधि (घेरा), परिवेश, परिघ, वायु, उल्का, दिग्दाह, भौंचाल, संध्याका फूलना, गन्धर्वनगर, धूरि, निर्घात, वस्तुओंका महंगा हो जाना, नाजका उत्पन्न होना, इन्द्रध्वज, इन्द्रधनुष, वास्तुविद्या (राजगीरी वगैरह आदि), अंगविद्या, वायसविद्या, अन्तरचक्र, मृगचक्र, अश्वचक्र, वातचक्र, प्रासादलक्षण प्रतिमालक्षण, प्रतिमाप्रतिष्ठा, वृक्षआयुर्वेद, वृक्षदोहद, उदगार्गल, नीराजन (निर्जन), खंजन, उत्पातशान्ति, मयूरचित्रक, घृतलक्षण, कम्बललक्षण, खड्गलक्षण, पट्टलक्षण, कृकवाकु (मुर्गा) लक्षण, कूर्मलक्षण, गोलक्षण, अजालक्षण, श्व (कुत्ता) लक्षण, अश्वलक्षण, हस्तिलक्षण, पुरुषलक्षण, स्त्रीलक्षण, अन्तःपुरचिन्ता, पिटक (देहादिमें बना हुआ पिराग) लक्षण, मोजेके लक्षण, वस्त्रच्छेदलक्षण, चामरलक्षण, दण्डलक्षण, शय्यालक्षण, आसनलक्षण, रत्नपरीक्षा, दीपक-

गच्छेत् कदाचिदनृषिर्मनसापि पारम् ॥ ४ ॥ होराशास्त्रेऽपि राशिहोरादेक्काणनवांशकद्वादशभागत्रिंशद्भागबलाबलपरिग्रहो ग्रहाणां दिक्स्थानकालचेष्टाभिरनेकप्रकारबलनिर्धारणं प्रकृतिधातुद्रव्यजातिचेष्टादिपरिग्रहो निषेकजन्मकालविस्मापनप्रत्ययादेशसद्योमरणायुर्दायदशान्तर्दशाष्टकवर्गराजयोगचन्द्रयोगद्विग्रहादियोगानां नाभसादीनाञ्च योगानां फलान्याश्रयभावावलोकननिर्याणगत्यनूकानि तात्कालिकप्रश्नशुभाशुभनिमित्तानि विवाहादीनाञ्च कर्म्मणां करणम् । यात्रायाञ्च तिथिदिवसकरणनक्षत्रमुहूर्तविलग्नयोगदेहस्पन्दनस्वप्नविजयस्नानग्रहयज्ञगणयागाग्निलिङ्गहस्त्यश्वेङ्गितसेनाप्रवादचेष्टादिग्रहषाड्गुण्योपायमंगलामङ्गलशकुनसैन्यनिवेशभूमयोऽग्निवर्णा मन्त्रिचरदूताटविकानां यथाकालं प्रयोगाः परदुर्गलम्भोपायोश्चत्युक्तं चाचार्यैः । जगति प्रसारितमिवालिखितमिव मतौ

तन्त्रको जानता हो, छाया, जल, यन्त्र आदि द्वारा लग्नको जान सकता हो और होराशास्त्रमें निपुण हो ऐसे पुरुषकी वाणी कदाचित् भी मिथ्या नहीं हो सकती । आर्य विष्णुगुप्तने कहाभी है-कि कदाचित् कोई पुरुष समुद्रको तैरकर पार होना चाहे तो वायुके वेगसे तैरकर पार हो सकता है परन्तु यह कालपुरुषका रूप जो ज्योतिष शास्त्र समुद्र है उसको ऋषिभिन्न मनुष्य मनसेभी पार नहीं हो सकता है । होरा शास्त्रमेंभी राशि, होरा, द्रेकाण, नवांश, द्वादशांश, त्रिंशांश और बलाबल, परिग्रह, स्थान, काल और चेष्टा आदि अनेक प्रकारसे ग्रहबलका निर्द्धारण है; प्रकृति, धातु, द्रव्य, जाति और चेष्टा आदिका परिग्रह, निषेक, जन्मकाल, विस्मापन, प्रत्यय (विश्वास), आदेश, शीघ्रमरण, आयुर्दाय, दशा, अन्तर्दशा, अष्टवर्ग, राजयोग, चन्द्रयोग, द्विग्रहादियोग और नाभसादि सब योगोंका फल; आश्रय, भाव, दृष्टि, निर्याण, गति और अनूकादि व तिस कालके सब प्रश्नोंका शुभाशुभ कारण, सबही विवाहादि कर्म्म समूहोंका हेतु, यात्राका वर्णन; तिथि, दिवस, करण, नक्षत्र मुहूर्त्त, लग्न, योग, शरीरके अंगोंका फडकना, स्वप्न, विजय, स्नान, ग्रहयज्ञ, गणयात्रा, अग्निलिंग, हाथी घोडेके संकेत, सेनाप्रवादकी चेष्टा इत्यादि, षाड्गुण्य-उपाय, मंगल अमंगलके शकुन, सेनाके वास करनेकी भूमियें, अग्नियोंका वर्ण, मंत्री, चर, दूत और वनचारियोंका कालानुसार प्रयोग, परदुर्गोपालम्भका उपाय, सब यात्राओंका हेतु स्वरूप; यह सब बातें होराशास्त्रमें कही हैं । आचार्योंने कहा है; जगत्में प्रचार हुएकी समान, बुद्धिमें लिखे हुएकी समान, हृदयमें ढाले हुएकी समान भगणसहित शास्त्र अर्थात् इस ज्योतिषशास्त्रको जो भलीभांतिसे

निषिक्तमिव हृदये । शास्त्रं यस्य सभगणं नादेशा निष्फलास्तस्य ॥५॥ संहितापारगश्च दैवचिन्तको भवति । यत्रैते संहितापदार्थाः । दिनकरादीनां ग्रहाणां चारास्तेषु च तेषां प्रकृतिविकृतिप्रमाणवर्णकिरणद्युतिसंस्थानास्तमनोदयमार्गमार्गान्तरवक्रानुवक्रर्क्षग्रहसमागमचारादिभिः फलानि नक्षत्रकूर्मविभागेन देशेष्वगस्त्यचारः सप्तर्षिचारो ग्रहभक्तयो नक्षत्रव्यूहग्रहशृङ्गाटकग्रहयुद्धग्रहसमागमग्रहवर्षफलगर्भलक्षणरोहिणीस्वात्याषाढीयोगाः सद्योवर्षकुसुमलतापरिधिपरिवेषपरिघपवनोल्कादिग्दाहक्षितिचलनसन्ध्यारागगन्धर्वनगररजोनिर्घातार्घकाण्डसस्यजन्मेन्द्रध्वजेन्द्रचापवास्तुविद्याङ्गविद्यावायसविद्यान्तरचक्रमृगचक्राश्वचक्रवातचक्रप्रासादलक्षणप्रतिमालक्षणप्रतिष्ठापनवृक्षायुर्वेदोदगार्गलनीराजनखञ्जनोत्पातशान्तिमयूरचित्रकघृतकम्बलखड्गपट्टकृकवाकुकूर्मगोऽजाश्वेभपुरुषस्त्रीलक्षणान्यन्तःपुरचिन्तापिटकलक्षणोपानच्छेदवस्त्रच्छेदचामरदण्डशय्यासनलक्षणरत्नपरीक्षादीप-

---

जानता है, उसका आदेश कभी निष्फल नहीं होता है ॥ ५ ॥ ज्योतिषशास्त्रके संहिताओंमें चतुर पुरुषही दैवज्ञ हो सकते हैं । क्योंकि संहिताओंमें इन सब बातोंका निरूपण होता है; यथा,—सूर्यादिग्रहकी चाल, तिनमें सूर्यादि सब ग्रहोंका स्वभाव, विकार, प्रमाण, वर्ण, किरण, ज्योति, संस्थान, उदय, अस्त, मार्ग, पृथक् मार्ग, वक्र, अनुवक्र और नक्षत्र, ग्रह, व समागमादिसे कालका निरूपण करना, नक्षत्रविभाग और कूर्मविभागसे सब देशोंमें उसका फल, अगस्त्यकी चाल, सप्तर्षियोंकी चाल, ग्रहभक्ति, नक्षत्रव्यूह, ग्रहशृंगाटक, ग्रहयुद्ध, ग्रहसमागम, ग्रहण, वर्षाका फल, गर्भलक्षण, रोहिणीयोग, स्वातीयोग, आषाढीयोग, शीघ्र वर्षाका होना, कुसुम, लता, परिधि (घेरा), परिवेष, परिघ, वायु, उल्का, दिग्दाह, भौंचाल, संध्याका फूलना, गन्धर्वनगर, धूरि, निर्घात, वस्तुओंका महँगा हो जाना, नाजका उत्पन्न होना, इन्द्रध्वज, इन्द्रधनुष, वास्तुविद्या (राजगीरी वगैरः आदि), अंगविद्या, वायसविद्या, अन्तरचक्र, मृगचक्र, अश्वचक्र, वातचक्र, प्रासादलक्षण, प्रतिमालक्षण, प्रतिमाप्रतिष्ठा, वृक्षआयुर्वेद, वृक्षदोहद, उदगार्गल, नीराजन (निर-जन), खंजन, उत्पातशान्ति, मयूरचित्रक, घृतलक्षण, कम्बललक्षण, खड्गलक्षण, पट्टलक्षण, कृकवाकु (कुक्कुट) लक्षण, कूर्मलक्षण, गोलक्षण, अजलक्षण, कु. र (कुत्ता) लक्षण, अश्वलक्षण, हस्तिलक्षण, पुरुषलक्षण, स्त्रीलक्षण, अन्तःपुर-चिन्ता, पिटक (देहादिमें बना हुआ पिटक) लक्षण, मोतीके लक्षण, वस्त्रछेद-लक्षण, चामरलक्षण, दण्डलक्षण, शय्यालक्षण, आसनलक्षण, रत्नपरीक्षा, दीपक-

क्षणं दन्तकाष्ठाद्याश्रितानि शुभाशुभानि निमित्तानि सामान्यानि च जगतः प्रतिपुरुषं पार्थिवे च प्रतिक्षणमनन्यकर्माभियुक्तेन दैवज्ञेन चिन्तयितव्यानि । न चैकाकिना शक्यन्तेऽहर्निशमवधारयितुं निमित्तानि । तस्मात् सुभृतेनैव दैवज्ञेनान्ये तद्विदश्चत्वारो भर्तव्याः । तत्रैकेनैन्द्रीचाग्नेयी च दिग्वलोकयितव्या । याम्या नैर्ऋती चान्येनैवं वारुणी वायव्या चोत्तरा चैशानी चेति । यस्मादुल्कापातादीनि निमित्तानि शीघ्रमुपगच्छन्तीति । तेषां चाकारवर्णस्नेहप्रमाणादिग्रहर्क्षाभिघातादिभिः फलानि भवन्ति ॥६॥ उक्तञ्च गर्गेण महर्षिणा । कृत्स्नाङ्गोपाङ्गकुशलं होरागणिततैष्ठिकम् । यो न पूजयते राजा स नाशमुपगच्छति ॥ ७ ॥ वनं समाश्रिता येऽपि निर्ममा निष्परिग्रहाः । अपि ते परिपृच्छन्ति ज्योतिषां गतिकोविदम् ॥ ८ ॥ अप्रदीपा यथा रात्रिरनादित्यं यथा नभः । तथाऽसांवत्सरो राजा भ्रमत्यन्ध इवाध्वनि ॥ ९ ॥ मुहूर्तं तिथिनक्षत्रमृतवश्चायने तथा । सर्वाण्येवाकुलानि स्युर्न स्यात् सांवत्सरो यदि ॥ १० ॥

क्षण और दन्तकाष्ठादि आश्रित समस्त शुभाशुभनिमित्त इस संहितासे प्रगट हो जाते हैं । दैवज्ञलोगोंको उचित है कि दूसरे कार्योंमें मन न लगाकर संसारके और प्रत्येक पुरुषके लिये समस्त पार्थिव वार्तोंमें साधारण, असाधारण, समस्त शुभाशुभको सर्वदा विचारें । परन्तु दिनरात इन वार्तोंका शुभाशुभ निर्णय करना अकेले आदमीका काम नहीं है; अत एव सुभृत दैवज्ञके साथ इस प्रकारके शास्त्र जाननेवाले औरभी चार आदमियोंको राजा नियत करे । तिनमेंसे एक आदमीको पूर्व और अग्निकोणकी वातें देखनी चाहिये । दूसरेको दक्षिण और नैर्ऋत्यकी, तीसरेको पश्चिम और वायुकोणकी, चौथेको उत्तर और ईशानकोणकी वातें देखनी चाहिये कि जिससे उल्कापातादि निमित्त शीघ्र मालूम हो जाय । क्योंकि इन उल्कापातादिका फल आकार, वर्ण, स्नेहप्रमाणादि और ग्रह नक्षत्र व अभिघातादिके सहित होता है । गर्गाचार्यने कहा है—साङ्गोपांग कुशल, होरा और गणितविषयमें चतुर दैवज्ञको जो राजा नहीं पूजता है, वह शीघ्रही नाशको प्राप्त हो जाता है ॥ ६ ॥ ७ ॥ वनवासी, ममताहीन और कुछ न ग्रहण करनेवाले पुरुषभी, ग्रहनक्षत्रादिकी गति जाननेवाले पंडितोंसे सब वातें पूंछा करते हैं ॥ ८ ॥ दीपकहीन रात्रि और सूर्यहीन आकाशकी समान दैवज्ञहीन राजाभी शोभायमान नहीं होता; वरन वह अन्धेकी समान कुपंथमें घूमा करता है ॥ ९ ॥ विना दैवज्ञके मुहूर्त, तिथि,

तस्माद्राज्ञाभिगन्तव्यो विद्वान् सांवत्सरोऽग्रणीः। जयं यशः श्रियं भोगान् श्रेयश्च समभीप्सता ॥ ११ ॥ नासांवत्सरिके देशे वस्तव्यं भूतिमिच्छता। चक्षुर्भूतो हि यत्रैष पापं तत्र न विद्यते ॥ १२ ॥ न सांवत्सरपाठी च नरकेषूपपद्यते। ब्रह्मलोकप्रतिष्ठाश्च लभते दैवचिन्तकः ॥ १३ ॥ ग्रन्थतश्चार्थतश्चैतद् कृत्स्नं जानाति यो द्विजः। अग्रभुक् स भवेच्छ्राद्धे पूजितः पंक्तिपावनः ॥१४॥ म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्। ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्द्विजः ॥ १५ ॥ कुहकावेशपिहितैः कर्णोपश्रुतिहेतुभिः। कृतादेशो न सर्वत्र प्रष्टव्यो न स दैववित् ॥ १६ ॥ अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते। स पंक्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः ॥ १७ ॥ नक्षत्रसूचकोद्दिष्टमुपवासं करोति यः। स व्रजत्यन्धतामिस्रं सार्धमृक्षविडंबिना ॥ १८ ॥ नगरद्वारलोष्टस्य यद्वत् स्यादुपयाचितम्। आदेशस्तद्वदज्ञानां

नक्षत्र, ऋतु और अयनादि सब उलट पलट हो जांय ॥ १० ॥ इस कारण जय, यश, श्री, भोग और मंगलार्थी राजाको विद्वान् और अग्रणी दैवज्ञके निकट जाना अर्थात् सब कुछ जान लेना उचित है ॥ ११ ॥ जिस देशमें दैवज्ञ न रहता होय, उस देशमें वास करना उचित नहीं है; क्योंकि सब बातोंका नेत्ररूप दैवज्ञ जहां वास करता है वहांपर कोईभी पाप नहीं रहता है ॥ १२ ॥ दैवज्ञके पास पढनेसे या दैवज्ञको पढानेसे नरकमें नहीं जाना पडता, वरन दैवचिन्तक होनेसे ब्रह्मलोकमें प्रतिष्ठा मिलती है ॥ १३ ॥ जो ब्राह्मण इस विषयको ग्रंथके अनुसार वा अर्थके अनुसार वा भलीभांति जान लेते हैं, वह श्राद्धमें प्रथम भोजन करनेवाले और पंक्तिपावन होकर सब जगह पूजे जाते हैं ॥ १४ ॥ म्लेच्छ या यवनके पासभी जो यह शास्त्र हो तो ऋषिलोगोंकी समान उनकी भी पूजा करनी चाहिये; फिर दैवचिन्तक ब्राह्मणके लिये इससे अधिक विशेष क्या कहा जाय ॥ १५ ॥ किसी प्रकारसे कुहक (माया, धोखा, जालसाजी) करके ढका हुआ अथवा कानोंसे श्रवण करनेके हेतु विशिष्ट अर्थात् निन्दाभाजन होनेपर दैवज्ञसे कोई बात न पूछे और दैवज्ञभी न कहे ॥ १६ ॥ जो पुरुष बिना शास्त्रके जाने हुए दैवज्ञ हो जाय, उस पंक्तिदूषक पापात्माको "नक्षत्रसूचक" (पढिया) जानें ॥ १७ ॥ नक्षत्रसूचकके उपदेश किये हुए उपवासा-दिको जो पुरुष करता है, वह आदमी उस नक्षत्रसूचकके साथ अंधतामिस्र नामक नरकमें पडता है ॥ १८ ॥ नगरद्वारलोष्टकी मार्थनाके (पढीमालग्रामादि

यः सत्यः स विभाव्यते ॥ १९ ॥ सम्पत्त्या योजितादेशस्तद्विच्छिन्नकथाप्रियः । मत्तः शास्त्रैकदेशेन त्याज्यस्तादृङ् महीक्षिता ॥ २० ॥ यस्तु सम्यग्विजानाति होरागणितसंहिताः । अभ्यर्च्यः स नरेन्द्रेण स्वीकर्तव्यो जयैषिणा ॥ २१ ॥ न तत्सहस्रं करिणां वाजिनां वा चतुर्गुणम् । करोति देशकालज्ञो यदेको दैवचिन्तकः ॥ २२ ॥ दुःस्वप्नदुर्विचिन्तितदुःप्रेक्षितदुष्कृतानि कर्माणि । क्षिप्रं प्रयान्ति नाशं शशिनः श्रुत्वा भसंवादम् ॥ ॥ २३ ॥ न तथेच्छति भूपतेः पिता जननी वा स्वजनोऽथवा सुहृत् । स्वयशोऽभिविवृद्धये यथा हितमाप्तः सबलस्य दैववित् ॥ २४ ॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां सांवत्सरसूत्रं द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ।

आश्लेषार्धाद्दक्षिणमुत्तरमयनं धनिष्ठाद्यम् । नूनं कदाचिदासीद् येनोक्तं पूर्वशास्त्रेषु ॥ १ ॥ साम्प्रतमयनं सवितुः कर्कटकाद्यं मृगादितश्चान्यत् । उक्ता–

अभिलाषकी) समान, अज्ञानी पुरुषका आदेश कभी सत्यभी हो जाता है ॥१९॥ सम्पत्तियुक्त अर्थात् अनेक प्रकारके अर्थको बतानेवाले, अथवा सम्पत्तिहीन बातें जिनको अत्यन्त प्यारी हों, और थोडेसेही ज्ञानसे मतवाले होनेवाले दैवज्ञको राजा त्याग देवे ॥ २० ॥ होरा, गणित और संहितामें उत्तम ज्ञान रखनेवाले दैवज्ञको, जीतकी इच्छा करनेवाले राजा लोग पूजें और उसको अंगीकार करें ॥ २१ ॥ एक देशकालका जाननेवाला दैवचिंतक जो काम करनेकी सामर्थ्य रखता है उस कार्यको हजार हाथी या चार हजार घोडे नहीं कर सक्ते ॥ २२ ॥ दैवज्ञके मुखसे चन्द्रका नक्षत्रसंवाद श्रवण करनेसे बुरे स्वप्न, बुरे देखे हुए और बुरे कर्म इनका शीघ्रही नाश हो जाता है ॥ २३ ॥ दैवज्ञलोग अपना यश बढानेके अर्थ बलवाले राजाका इस प्रकार हित करते हैं कि जिस प्रकार उस राजाके पिता, माता, स्वजन और भाई बन्धुभी नहीं कर सक्ते ॥ २४ ॥

इति श्रीवराहमिहिराचार्यविरचितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्यपण्डितबलदेवप्रसादमिश्रविरचितायां भाषाटीकायां द्वितीयोऽध्यायः ॥ २ ॥

निश्चयही किसी समयमें आश्लेषा नक्षत्रके अर्द्धभागसे दक्षिणायन और धनिष्ठाके प्रथमसे उत्तरायण प्रचलित था, नहीं तो पहिले शास्त्रोंमें इसका वर्णन क्यों

भावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः ॥ २ ॥ दूरस्थचिह्नवेधादुदयेऽस्तमयेऽपि वा सहस्रांशोः । छायाप्रवेशनिर्गमचिह्नैर्वा मण्डले महति ॥ ३ ॥ अप्राप्य मकरमर्को विनिवृत्तो हन्ति सापरां याम्याम् । कर्कटकमसम्प्राप्तो विनिवृत्तश्चोत्तरामैन्द्रीम् ॥ ४ ॥ उत्तरमयनमतीत्य व्यावृत्तः क्षेमसस्यवृद्धिकरः । प्रकृतिस्थश्चाप्येवं विकृतगतिर्भयकृदुष्णांशुः ॥ ५ ॥ सतमस्कं पर्व विना त्वष्टा नामार्कमण्डलं कुरुते । स निहन्ति सप्त भूपान् जनांश्च शस्त्राग्निदुर्भिक्षैः ॥ ६ ॥ तामसकीलकसंज्ञा राहुसुताः केतवस्त्रयस्त्रिंशत् । वर्णस्थानाकारैस्तान् दृष्ट्वार्के फलं ब्रूयात् ॥ ७ ॥ ते चार्कमण्डलगताः पापफलाश्चन्द्रमण्डले सौम्याः । ध्वाङ्क्षकबन्धप्रहरणरूपाः पापाः शशाङ्केऽपि ॥ ८ ॥ तेषामुदये रूपाण्यम्भः कलुषं रजोवृतं व्योम । नगतरुशिखरविमर्दी सशर्करो मारुतश्चण्डः ॥ ९ ॥ ऋतुविपरीतास्तरवो दीप्ता मृगपक्षिणो दिशां दाहः । निर्घातमहीकम्पादयो भवन्त्यत्र

होता ? परन्तु सूर्यका जो अयन इस समयमें प्रचलित है वह धनिष्ठाके आदि और मकरके प्रथमसेही आरम्भ होता है इस विषयके प्रमाणकोही विकृति कहते हैं; प्रत्यक्ष परीक्षा करनेसे जो ठीक होगा उसकोही प्रमाणित किया जायगा ॥ १ ॥ २ ॥ सूर्यके उदय वा अस्तकालमें महामंडलकी दूरीके चिह्नोंके वेधसे अथवा महामण्डलमें छायाके प्रवेश और छायाके निकलनेके चिह्नोंसे अयनकी परीक्षा होती है ॥ ३ ॥ सूर्य विना मकरराशिमें गये यदि लौट आवें तो दक्षिण–पश्चिम दिशाका नाश करते हैं, और जो विना कर्कराशितक गये लौट आवें तो पूर्व उत्तर दिशाको नष्ट करते हैं, यदि उत्तरायणको लांघकर लौट आवें तो मंगल होता है, धान्यकी वृद्धि होती है, इसको ही प्रकृतिस्थ सूर्य कहते हैं; सूर्यकी गति विकृत होनेसे भय होता है ॥ ४ ॥ ५ ॥ यदि विना पर्वकालके सूर्य अपने मंडलको राहुयुक्त करे तब सात राजाओंकी मृत्यु होयगी, और शस्त्र अग्नि वा दुर्भिक्ष आदिसे मनुष्योंका नाश होयगा ॥ ६ ॥ तामस और कीलकादि नामवाले राहुके पुत्र केतु तेंतीस प्रकारके हैं, वर्ण, स्थान और आकारादिसे सूर्यमंडलमें उनको देखकर फल निर्णय करना चाहिये ॥ ७ ॥ वह यदि सूर्यमंडलमें जाय तो अमंगलकारक है, परन्तु चन्द्रमंडलमें जाय तो शुभफलको देते हैं, जो वह चन्द्रमंडलमें काक, कबन्ध वा शस्त्रके रूपसे प्रकाशित होवें तो अमंगलदायक है ॥ ८ ॥ इन केतुओंका उदय होनेसे नदियोंमें उथल पुथल हो जाती है; जल मलीन हो जाता है, आकाशमें धूरी छा जाती है, पर्वत और वृक्षोंके शिखरको मर्दन करनेवाला प्रचण्ड पवन चले ।

ताताः ॥ १० ॥ न पृथक् फलानि तेषां शिखिकीलकराहुदर्शनानि यदि ।
दयकारणमेषां केत्वादीनां फलं ब्रूयात् ॥ ११ ॥ यस्मिन् यस्मिन् देशे
नमायान्ति सूर्यविम्बस्थाः । तस्मिंस्तस्मिन् व्यसनं महीपतीनां परिज्ञेयम्
१२ ॥ क्षुत्प्रम्लानशरीरा मुनयोऽप्युत्सृष्टधर्मसच्चरिताः । निर्मांसबालहस्ताः
क्लेशायान्ति परदेशान् ॥ १३ ॥ तस्करविलुप्तवित्ताः प्रदीर्घनिःश्वासमुकु-
ताक्षिपुटाः । सन्तः सन्नशरीराः शोकोद्भवबाष्परुद्धदृशः ॥ १४ ॥ क्षामा
पुष्यमानाः स्वनृपतिपरचक्रपीडिता मनुजाः । स्वनृपतिचरितं कर्म्म च पराकृतं
व्रुवन्त्यन्ये ॥ १५ ॥ गर्भेष्वपि निष्पन्ना वारिमुचो न प्रभूतवारिमुचः । सरितो
न्ति तनुत्वं क्वचित् क्वचिज्जायते सस्यम् ॥१६॥ दण्डे नरेन्द्रमृत्युर्व्याधिभयं
ात् कबन्धसंस्थाने । ध्वाङ्क्षे च तस्करभयं दुर्भिक्षं कीलकेऽर्कस्थे ॥ १७॥
नोपकरणरूपैश्छत्रध्वजचामरादिभिर्विद्धः । राजान्यत्वकृदर्कः स्फुलिङ्गधू-

ती है, वृक्ष ऋतुमें विपरीत हो जाते हैं मृग और पक्षी इत्यादि मदीम दिशा-
ओंकी ओरें दौडते या शब्द करते हैं, दिग्दाह, निर्घात और भौंचाल आदि बड़े २
पात होते हैं ॥ ९ ॥ १० ॥ इन राहुके पुत्रोंमें यदि बाण या नाम्भादि रूप-
से राहुका दर्शन होय तौ पहिलेकी समान फल कहना चाहिये इस प्रकारसे उनके
उदयका कारण और केतु आदिका फलाफल निर्णय करे ॥ ११ ॥ सूर्यविम्बवाले
तु जिन जिन देशोंमें दिखाई दें,उन्हीं २ देशोंके राजाका अमंगल होयगा ॥१२॥
के उदय होनेसे मुनिलोगभी भूंखसे थकित देहवाले और स्वधर्म व श्रेष्ठ चरित्रसे
न होकर मांसहीन बालकोंको हाथमें लेकर अतिकष्टसे दूसरे देशोंमें जायँगे॥१३॥
पुरुषोंके वित्तको तस्कर चुरा लेंगे, इस कारण वह लम्बे लम्बे सांस छोडते हुए
आंखोंमें आंसू बहाते व्याकुल देहसे शोकके मारे गद्गद कंठ होकर रहेंगे ॥ १४ ॥
स कालमें मनुष्य अपने राजा या दूसरे राजचक्रसे अत्यन्त दुबले होकर निन्दा-
ती हो जायँगे. कोई स्वदेशीय राजाके चरित्र या पराकृत कर्मभी निन्दा करेंगे
१५ ॥ मेघ गर्भयुक्त होकरही रहेंगे, बहुतसा जल नहीं देंगे, नदियें कम जलवाली
जायँगी, अन्न कहीं कहीं उत्पन्न होगा ॥ १६ ॥ सूर्यमण्डलमें दण्डाकार
ह दिखाई देनेसे राजाका मरण होता है, कबन्ध दिखाई देनेसे व्याधिका
य उत्पन्न होता है, ध्वांक्षाकार दिखाई देनेसे चोरभय और स्तम्भका
कार दीखनेसे अकाल होता है ॥ १७ ॥ राजाके उपकरणरूप छत्र,

१ दीप्ता इत्यादि दिशाओंका वर्णन शकुनाध्यायमें करेंगे ।

मादिभिर्जनहा ॥ १८ ॥ एको दुर्भिक्षकरो द्वयाद्याः स्युर्नरपतेर्विनाशाय । सितरक्तपीतकृष्णैस्तैर्विद्धोऽर्कोऽनुवर्णघ्नः ॥ १९ ॥ दृश्यन्ते च यतस्ते रविबिम्बस्योत्थिता महोत्पाताः । आपच्छति लोकानां तेनैव भयं प्रदेशेन ॥ २० ॥ ऊर्ध्वकरो दिवसकरस्ताम्रः सेनापतिं विनाशयति । पीतो नरेन्द्रपुत्रं श्वेतस्तु पुरोहितं हन्ति ॥ २१ ॥ चित्रोऽथवापि धूम्रो रविरश्मिर्व्याकुलां करोति महीम् । तस्करशस्त्रनिपातैर्यदि सलिलं नाशु पातयति ॥ २२ ॥ ताम्रः कपिलो वार्कः शिशिरे हरिकुंकुमच्छविश्च मधौ । आपाण्डुकनकवर्णो ग्रीष्मे वर्षासु शुक्लश्च ॥ २३ ॥ शरदि कमलोदराभो हेमन्ते रुधिरसन्निभः शस्तः । प्रावृट्काले स्निग्धः सर्वर्तुनिभोऽपि शुभदायी ॥ २४ ॥ रूक्षः श्वेतो विप्रान् रक्ताभः क्षत्रियान्विनाशयति । पीतो वैश्यान् कृष्णस्ततोऽपरान् शुभकरः स्निग्धः ॥२५॥

ध्वज, चामरादि चिह्न यदि सूर्यमण्डलमें विधे हुए हों तो राज्यकी बदली होती है और चिनगारी या धूमादिसे ढक जानेपर सब मनुष्योंकी मृत्यु होती है ॥ १८ ॥ पूर्वश्लोकोक्त छत्रादि एक चिह्नसे सूर्य विद्ध होवे तो दुर्भिक्ष होता है, दो आदिसे विद्ध होवे तो राजाका नाश होता है; सफेद, लाल, पीला और काला इन वर्णवाले पूर्वोक्त चिह्नसे विद्ध होनेपर क्रमसे ब्राह्मण, क्षत्रिय, वैश्य और शूद्रका नाश होता है ॥ १९ ॥ उत्पन्न हुए यह महाउत्पात रविबिम्बमें जहां कहीं दिखाई देंगे, उस देशके रहनेवाले सब लोगोंको भय होगा ॥ २० ॥ सूर्यके ऊपर भागकी किरण जो ताम्ररंगकी होय तो सेनापतिका नाश होता है, पीतरंगकी होय तो राजपुत्रका और श्वेतवर्णकी होय तो राजपुरोहितका नाश होता है ॥२१॥ सूर्यका किरणमण्डल यदि अनेक रंगोंसे रंगा हुआ होय अथवा धूम्रवर्ण होय, यदि शीघ्र वर्षा न हो तो चोरोंसे या शस्त्रनिपातादिसे समस्त पृथिवी व्याकुल होयगी ॥ २२ ॥ सूर्यमण्डल शिशिरकालमें ताम्रवर्ण या कपिलवर्ण, वसन्तकालमें हरित कुमकुमकी समान, ग्रीष्मकालमें कुछएक पाण्डुवर्ण (श्वेत और पीत मिला हुआ) और स्वर्णकी समान, वर्षाकालमें शुक्लवर्ण, शरदकालमें कमलके गर्भकी छविके समान और हेमन्तकालमें रक्तवर्ण होनेपर शुभकारक है, परन्तु वर्षाकालमें स्निग्ध होनेपर अशुभ होता है ॥ २३ ॥ २४ ॥ रूखा या श्वेतवर्ण होनेसे ब्राह्मणोंका नाश होता है, रक्तकी आभायुक्त होनेपर क्षत्रीका नाश, पीतवर्णसे वैश्यका और काला वर्ण होनेसे शूद्रका नाश होता है, सूर्यके इन सब रंगोंमें चमक हो तो शुभ होता है ॥ २५ ॥

ग्रीष्मे रक्तो भयकृद्वर्षास्वसितः करोत्यनावृष्टिम् । हेमन्ते पीतोऽर्कः करोत्यचिरेण रोगभयम् ॥ २६ ॥ सुरचापपाटिततनुर्नृपतिविरोधप्रदः सहस्रांशुः । प्रावृट्काले सद्यः करोति विमलद्युतिर्वृष्टिम् ॥ २७ ॥ वर्षाकाले वृष्टिं करोति सद्यः शिरीषपुष्पाभः । शिखिपत्रनिभः सलिलं न करोति द्वादशाब्दानि ॥ २८ ॥ श्यामेऽर्के कीटभयं भस्मनिभे भयमुशन्ति परचक्रात् । यस्यर्क्षे सच्छिद्रस्तस्य विनाशः क्षितीशस्य ॥ २९ ॥ शशरुधिरनिभे भानौ नभस्तलस्थे भवन्ति संग्रामाः । शशिसदृशे नृपतिवधः क्षिप्रं चान्यो नृपो भवति ॥ ३० ॥ क्षुन्मारकृद्घटनिभः खण्डो नृपहा विदीधितिर्भयदः । तोरणरूपः पुरहा छत्रनिभो देशनाशाय ॥ ३१ ॥ ध्वजचापनिभे युद्धानि भास्करे वेपने च रूक्षे च । कृष्णा रेखा सवितरि यदि हन्ति नृपं ततः सचिवः ॥ ३२ ॥ दिवसकरमुदयसंस्थित-

ग्रीष्मकालमें सूर्यका मण्डल लाल होवे तौ प्राणियोंको भय होता है, वर्षाकालमें कृष्णवर्ण हो तौ अनावृष्टि होती है और हेमन्तकालमें पीतवर्ण होय तौ शीघ्रही रोगभय होता है ॥ २६ ॥ जो सूर्यमण्डल वर्षाके समय इन्द्रका चाप सन्मुख आ पडनेसे खण्डित देहवाला दिखाई दे तौ राजाओंमें विरोध होता है, यदि निर्म्मल किरणवाला दीखे तौ शीघ्रही वृष्टि होती है ॥ २७ ॥ यदि वर्षाकालमें सूर्यबिम्ब सिरीषके फूलकी समान आभावाला ज्ञात हो तौ शीघ्र वर्षा होयगी, परन्तु मोरकी पूंछके समान आभावाला दिखाई दे तौ बारह वर्षतक अनावृष्टि होयगी ॥ २८ ॥ सूर्यका बिम्ब श्यामवर्णवाला हो तौ (देशमें) कीटभय, राखकी समान वर्णवाला हो तौ परराष्ट्रसे भय होता है और जिस राजाके जन्मनक्षत्रमें विराजमान सूर्यमें छिद्र दिखाई दे तौ उस राजाका नाश हो जाता है ॥ २९ ॥ जो सूर्यका रंग [illegible] की समान शोणित हो तौ युद्ध होता है और चन्द्रमाकी समान रंगवाला दिखाई दे तौ शीघ्रही उस देशके राजाका नाश होकर दूसरा राजा हो जाता है ॥ ३० ॥ जो सूर्यमण्डल घडेके आकारसा दिखाई दे तौ (प्राणिगण) [illegible] प्राण छोडें, खण्डाकार होनेपर राजाका नाश होता है; [illegible] होता है, तोरण (फाटक) रूप होनेपर नगरका नाश होता है, [illegible] देशविनाश होता है ॥ ३१ ॥ जो सूर्यका बिम्ब कम्पायमान [illegible] अथवा धनुष या ध्वजाकी समान हो तौ संग्राम होता है, यदि सूर्यमण्डलमें काली रेखा दिखाई दे तौ मंत्रीसे राजाका नाश होता है ॥ ३२ ॥ उल्का, वज्र या बिजली जो उदयकालमें सूर्यको टक्कर दे तौ वर्तमान राजाका नाश होकर

सुल्काशनिविद्युतो यदा हन्युः । नरपतिमरणं विद्यात् तदान्यराजप्रतिष्ठां च ॥ ३३ ॥ प्रतिदिवसमहिमकिरणः परिवेषी सन्ध्ययोर्द्वयोरथवा । रक्तोऽस्तमेति रक्तोदितश्च भूपं करोत्यन्यम् ॥ ३४ ॥ प्रहरणसदृशैर्जलदैः स्थगितः सन्ध्याद्वयेऽपि रणकारी । मृगमहिषविहगखरकरभसदृशरूपैश्च भयदायी ॥ ३५ ॥ दिनकरकराभितापाद्वृक्षमवाप्नोति सुमहतीं पीडाम् । भवति च पश्चाच्छुद्धं कनकमिव हुताशपरितापात् ॥ ३६ ॥ दिवसकृतः प्रतिसूर्यो जलकृदुदग्दक्षिणे स्थितोऽनिलकृत् । उभयस्थः सलिलभयं नृपमुपरि निहन्त्यधो जनहा ॥ ३७ ॥ रुधिरनिभो वियत्यवनिपान्तकरो न चिरात् । परुषरजोऽरुणीकृततनुर्यदि वा दिनकृत् ॥ ३८ ॥ असितविचित्रनीलपरुषो जनघातकरः । खगमृगभैरवखररुतैश्च निशाद्यमुखे ॥ ३९ ॥ अमलवपुरवक्रमण्डलः स्फुटविपुलामल-

---

दूसरे राजाकी प्रतिष्ठा होती है ॥ ३३ ॥ जिस देशमें सूर्यदेव प्रतिदिन प्रातःकालमें और सन्ध्याकालमें परिधिवाले (पीपयुक्त) होते हैं अथवा लाल रंगको धारण करके उदय होते और छिपते हैं उस देशमें निश्चयही दूसरा राजा होता है ॥ ३४ ॥ यदि प्रातःकाल और सन्ध्याकालमें सूर्यबिम्ब शस्त्रके समान आकारवाले बादलोंसे घिर जाय तो युद्ध होगा और मृग, महिष, पक्षी, गधे और हाथीके समान मेघोंसे ढक जाय तो अत्यन्त भय होगा ॥ ३५ ॥ जैसे अग्निके तापसे सुवर्ण अत्यन्त पीडाको प्राप्त होकर पीछेसे शुद्ध हो जाता है, वैसेही समस्त नक्षत्र सूर्यकी किरणोंके सन्तापसे कष्ट पाकर फिर शुद्ध होते हैं ॥ ३६ ॥ सूर्यदेवकी उत्तर दिशामें यदि प्रतिसूर्य[1] दिखाई दे तो वृष्टि होगी, दक्षिणदिशामें दिखाई देनेसे आंधी तूफान होगा; सूर्यके दोनों ओर दिखाई देनेसे जलभय, नीचे दीखनेसे लोकविनाश और ऊपर दीखनेसे राजाका विनाश होता है ॥ ३७ ॥ यदि आकाशके ऊपर भागमें सूर्य लाल रंगका दिखलाई दे, या भयंकर धूलिकी राशिसे लाल वर्णका दिखाई दे तो शीघ्रही राजाकी मृत्यु होती है ॥ ३८ ॥ जो सूर्यका बिम्ब कृष्णवर्ण, चित्रवर्ण अथवा नीलवर्ण होकर भयंकर आकार धारण करे और जो सन्ध्याकालमें पक्षी और मृगोंका शब्द गधेके शब्दकी समान भयंकर हो तो सब लोगोंका विनाश हो जाता है ॥ ३९ ॥ जो सूर्य निर्मल देहवाला, गोलाकारवाला, स्पष्ट २ अपार निर्मल दीर्घ किरणवाला हो और उसकी देह विस्तारित हो तथा विक-

१ सूर्यके उदयकालमें जो रक्तवर्ण सूर्यकी समान पदार्थ दीखता है उसको ही प्रतिसूर्य कहते हैं।

होता है कि आधा पुरुष खोदनेपर कुछ श्वेत रंगका मेंडक निकलता है, फिर पीले रंगकी मट्टी निकलती है फिर परतदार पत्थर निकलता है उसके नीचे जल होता है ॥ ७ ॥ निर्जल देशमें जो जामुनका वृक्ष हो तो उससे तीन हाथ उत्तरको दो पुरुष नीचे पूर्व शिरा होती है वहां खोदनेसे लोहकी समान गन्धवाली मट्टी निकलती है फिर पाण्डुरंगकी मट्टी निकलती है और एक पुरुष नीचे मेंडक निकलता है ॥ ८ ॥ जामुनके वृक्षसे पूर्व दिशामें समीपही सर्पकी बांबी हो तो उस वृक्षसे तीन हाथ दक्षिण दो पुरुष नीचे मधुर जल होता है ॥ ९ ॥ आधा पुरुष खोदनेसे मछली निकलती है, कबूतरके रंगका पत्थर निकलता है, नीली मट्टी यहां होती है और जल बहुत होता है और अत्यन्त काल रहता है. आचार्यने यहां [illegible] न कहा, यहां पहला कहा प्रमाण जानना जैसा यहां प्रमाण नहीं [illegible] पूर्वोक्त तीन हाथ समझना चाहिये ॥ १० ॥ निर्जल देशमें गूलरका वृक्ष [illegible] दिखाई दे तो उससे तीन हाथ पश्चिम अढाई पुरुष नीचे शिरा होती है. [illegible] पुरुष नीचे श्वेत सर्प निकलता है, फिर अंजनके सदृश अत्यन्त कृष्ण [illegible] निकलता है, उसके नीचे सुन्दर जलवाली शिरा होती है ॥ ११ ॥ अर्जुन [illegible] उत्तर जो बांबी दिखाई दे तो उस अर्जुन वृक्षसे तीन हाथ पश्चिम [illegible] पुरुष नीचे जल होता है ॥ १२ ॥ आधा पुरुष खोदनेपर श्वेत [illegible] निकलती है, एक पुरुष नीचे धूसर रंगकी मट्टी निकलती है, फिर काली [illegible] श्वेत [illegible] निकलती है, उसके नीचे बहुत जल [illegible] ॥ १३ ॥ [illegible]

पुरुषद्वये सपादे स्वादु जलं भवति चाथोम्यम् ॥ १४ ॥ रोहितमत्स्योऽर्धनरे मृत्कपिला पाण्डुरा ततः परतः । सिकता सशर्कराथ क्रमेण परतो भवत्यम्भः ॥ १५ ॥ पूर्वेण यदि बदर्या वल्मीको दृश्यते जलं पश्चात् । पुरुषैस्त्रिभिरादेश्यं श्वेता गृहगोधिकार्धनरे ॥ १६ ॥ सपलाशा बदरी चेद् दिश्यपरस्यां ततो जलं भवति । पुरुषत्रये सपादे पुरुषेऽत्र च दुण्डुभिश्चिह्नम् ॥ १७ ॥ बिल्वोदुम्बरयोगे विहाय हस्तत्रयं तु याम्येन । पुरुषैस्त्रिभिरम्बु भवेत् कृष्णोऽर्धनरे च मण्डूकः ॥ १८ ॥ अर्कोदुम्बरिकायां वल्मीको दृश्यते शिरा तस्मिन् । पुरुषत्रये सपादे पश्चिमदिक्स्था वहति सा च ॥ १९ ॥ आपाण्डुपीतिका मृद्गोरसवर्णश्च भवति पाषाणः । पुरुषार्धे कुमुदनिभो दृष्टिपथं मूषको याति ॥२०॥ जलपरिहीने देशे वृक्षः कम्पिल्लको यदा दृश्यः । प्राच्यां हस्तत्रितये वहति शिरा दक्षिणा प्रथमम् ॥ २१ ॥ मृन्नीलोत्पलवर्णा कापोता चैव दृश्यते

हाथ दक्षिण सवा दो पुरुष नीचे मीठा और कभी न सूखनेवाला जल होता है ॥ १४ ॥ आधा पुरुष खोदनेपर रोहूमछली निकलती है. फिर क्रमानुसार कपिल रंगकी मट्टी, पांडुर रंगकी मट्टी और पत्थरके सूक्ष्म कणोंसे मिला हुआ वालू रेत निकलता है, उसके नीचे जल होता है ॥ १५ ॥ बेरवृक्षके पूर्व जो वल्मीक हो तो उस वृक्षसे तीन हाथ पश्चिम तीन पुरुषके नीचे जल कहना चाहिये. आधा पुरुष खोदनेसे सफेद रंगकी छपकिया निकलती है ॥ १६ ॥ निर्जल देशमें ढाकवृक्षयुक्त बेरी वृक्ष हो तो उससे पश्चिमको तीन हाथपर सवा तीन पुरुष नीचे जल होता है. वहां एक पुरुष खोदनेपर एक मकारका -निर्विष सर्प निकलता है यही चिह्न है ॥ १७ ॥ बेलका पेड व गूलरका पेड यह दोनों जहां इकट्ठे हों, उनसे दक्षिण तीन हाथ छोडकर तीन पुरुष नीचे जल होता है और आधा पुरुष खोदनेसे काले रंगका मेंडक निकलता है ॥ १८ ॥ आकगूलरवृक्षके अतिनिकट वल्मीक हो तो उस वल्मीकके नीचेही सवा तीन पुरुष खोदनेसे पश्चिमको वहनेवाली शिरा निकलती है ॥ १९ ॥ पाण्डु और पीले रंगकी मट्टी निकलती है. गोरस (गायका मठा) के समान श्वेतरंगका पत्थर निकलता है और आधे पुरुष नीचे कुमुदके फूलकी सदृश श्वेत रंगका चूहा दिखाई देता है ॥ २० ॥ निर्जल देशमें कपिलवृक्ष दिखाई दे तो उस वृक्षसे तीन हाथ पूर्वको सवा तीन पुरुषके नीचे दक्षिण शिरा वहती है ॥ २१ ॥ प्रथम नील कमलके रंगकी मट्टी

तस्मिन् । हस्तेऽजगन्धिमत्स्यो भवति पयोऽल्पं च सक्षारम् ॥ २२ ॥ शोणकतरोरपरोत्तरे शिरा द्वौ करावतिक्रम्य । कुमुदा नाम शिरा सा पुरुषत्रयवाहिनी भवति ॥ २३ ॥ आसन्नो वल्मीको दक्षिणपार्श्वे विभीतकस्य यदि। अध्यर्धे तस्य शिरा पुरुषे ज्ञेया दिशि प्राच्याम् ॥ २४ ॥ तस्यैव पश्चिमायां दिशि वल्मीको यदा भवेद्धस्ते। तत्रोदगभवति शिरा चतुर्भिरर्धाधिकैः पुरुषैः ॥ २५ ॥ श्वेतो विश्वम्भरकः प्रथमे पुरुषे तु कुंकुमाभोऽश्मा । अपरस्यां दिशि च शिरा नश्यति वर्षत्रयेऽतीते ॥ २६ ॥ सकुशासित ऐशान्यां वल्मीको यत्र कोविदारस्य। मध्ये तयोर्नरैरर्धपञ्चमैस्तोयमक्षोभ्यम् ॥ २७ ॥ प्रथमे पुरुषे भुजगः कमलोदरसन्निभो मही रक्ता। कुरुविन्दः पाषाणश्चिह्नान्येतानि वाच्यानि ॥ २८ ॥ यदि भवति सप्तपर्णो वल्मीकवृतस्तदुत्तरे तोयम् । वाच्यं पुरुषैः पञ्चभिरत्रापि भवंति चिह्नानि ॥ २९ ॥ पुरुषार्धे मण्डूको हरितो हरितालसन्निभा भूश्च । पाषाणोऽभ्रनिकाशः सौम्या

निकलती है, फिर कबूतरके रंगकी मट्टी दिखाई पडती है, एक हाथ नीचे मच्छी निकलती है. जिसमें चकोरकी समान दुर्गंध आती है, वहां थोडा और खारा जल निकलता है ॥ २२ ॥ निर्जल देशमें श्योनाकवृक्ष (अरलू) दिखाई दे तो उससे दो हाथ वायव्य कोणमें जाकर खोदनेसे तीन पुरुष नीचे क्रमानुसार शिरा निकलती है ॥ २३ ॥ बहेडा वृक्षके समीप वमई हो तो उस वृक्षसे दो हाथ पूर्व डेढ पुरुष नीचे शिरा होती है ॥ २४ ॥ बहेडेके वृक्षके पश्चिम दिशामें वमई हो तो उस वृक्षसे एक हाथ उत्तरको साढे चार पुरुष नीचे शिरा होती है ॥ २५ ॥ प्रथम एक पुरुष खोदनेपर श्वेत रंगका विश्वंभरक (एक प्रकारका जीव) दिखाई देता है, फिर केशरी रंगका पत्थर निकलता है. उसके नीचे पश्चिम दिशाको बहनेवाली शिरा निकलती है. परन्तु तीन वर्षके पीछे वह शिरा नष्ट हो जाती है अर्थात् वह सूख जाता है ॥ २६ ॥ कोविदारवृक्ष (सप्तपर्ण) के ईशानकोणमें कुश करके युक्त श्वेतरंगकी मट्टीकी वमई हो तो वहां कोविदारवृक्ष और वल्मीकके मध्यमें साढे पांच पुरुष नीचे बहुत जल होता है ॥ २७ ॥ पहले पुरुषमें कमलपुष्पके मध्यभागकी समान रंगका सर्प निकलता है, लाल वर्णकी भूमि आती है, फिर कुरुविन्दनामक पत्थर निकलता है, यह चिह्न कहने चाहिये ॥ २८ ॥ निर्जल देशमें वमईसे युक्त सप्तपर्णवृक्ष हो तो उससे एक हाथ उत्तर पांच पुरुष नीचे जल कहना चाहिये ॥ २९ ॥ यहांभी चिह्न होते हैं कि आध पुरुष खोदनेसे

प शिरा शुभाऽम्बुवहा ॥ ३० ॥ सर्वेषां वृक्षाणामधःस्थितो दर्दुरो यदा
दृश्यः । तस्माद्धस्ते तोयं चतुर्भिरर्धाधिकैः पुरुषैः ॥ ३१ ॥ पुरुषे तु भवति
नकुलो नीला मृत्पीतिका ततः श्वेता । दर्दुरसमानरूपः पाषाणो दृश्यते चात्र
॥ ३२ ॥ यद्यहिनिलयो दृश्यो दक्षिणतः संस्थितः करञ्जस्य । हस्तद्वये तु
याम्ये पुरुषत्रितये शिरा सार्धे ॥ ३३ ॥ कच्छपकः पुरुषार्धे प्रथमं चोद्भिद्यते
शिरा पूर्वा । उदगन्या स्वादुजला हरितोऽश्माऽधस्ततस्तोयम् ॥ ३४ ॥ उत्तर-
तश्च मधूकादहिनिलयः पश्चिमे तरोस्तोयम् । परिहृत्य पञ्च हस्तान् अर्धाष्टम-
पौरुषे प्रथमम् ॥ ३५ ॥ अहिराजः पुरुषेऽस्मिन् धूम्रा धात्री कुलत्थवर्णोऽश्मा ।
माहेन्द्री भवति शिरा वहति सफेनं सदा तोयम् ॥ ३६ ॥ वल्मीकः स्निग्धो
दक्षिणेन तिलकस्य सकुशदूर्वश्चेत् । पुरुषैः पञ्चभिरम्भो दिशि वारुण्यां शिरा
पूर्वा ॥ ३७ ॥ सर्पावासः पश्चाद् यदा कदम्बस्य दक्षिणेन जलम् । परतो

मेंडक निकलता है, पीछे हरितालके समान पीले रंगकी भूमि निकलती है, फिर मेघके समान कृष्णवर्ण पत्थर मिलता है. इन सबके नीचे मधुर जलसंयुक्त उत्तर-शिरा होती है ॥ ३० ॥ चाहे जिस वृक्षके नीचे बैठा हुआ मेंडक दिखाई दे तो उस वृक्षसे एक हाथ उत्तर साढे चार पुरुष नीचे जल होता है ॥ ३१ ॥ एक पुरुष नीचे न्योला निकलता है, फिर क्रमानुसार नीली, पीली और श्वेत मट्टी निकलती है, पीछे मेंडकके सदृश रंगका पत्थर दिखलाई पडता है ॥ ३२ ॥ यदि करंजवृक्षके दक्षिणमें वल्मीक दिखलाई पडे तो उस वृक्षसे दो हाथ दक्षिण साढे तीन पुरुष नीचे शिरा होती है ॥ ३३ ॥ आधे पुरुष नीचे कछुआ और फिर पहले पूर्वकी शिरासे जल निकलता है, दूसरी स्वादु जलसे युक्त उत्तर-शिरा बहती है, पहले हरे रंगका पत्थर और उसके नीचे जल होता है ॥ ३४ ॥ महुएके वृक्षसे उत्तर वल्मीक हो तो उस वृक्षसे पश्चिम पांच हाथ छोडकर साढे आठ पुरुष नीचे जल होता है ॥ ३५ ॥ पहला पुरुष खोदनेसे बडा सर्प दिखाई देता है. धूम्रवर्णकी भूमि फिर कुलथीके रंगका पत्थर निकलता है पीछे पूर्वशिरा निकलती है. जिसमें सदा झागदार जल बहता है ॥ ३६ ॥ तिलकवृक्षके दक्षिण कुशा और दूर्वा करके युक्त स्निग्ध वल्मीक हो तो उस वृक्षसे पांच हाथ पश्चिम पांच पुरुष नीचे जल होता है और पूर्वशिरा बहती है ॥ ३७ ॥ कदंबवृक्षके पश्चि-ममें वमई हो तो उस वृक्षसे तीन हाथ दक्षिण पौने छः पुरुष नीचे जल होता

हस्तत्रितयात् षड्भिः पुरुषैस्तुरीयोनैः ॥ ३८ ॥ कौवेरी चात्र शिरा वहति जलं लोहगन्धि चाक्षोभ्यम् । कनकनिभो मण्डूको नरमात्रे मृत्तिका पीता ॥ ३९ ॥ वल्मीकसंवृतो यदि तालो वा भवति नालिकेरो वा । पश्चात् षड्भिर्हस्तैर्नरैश्चतुर्भिः शिरा याम्या ॥ ४० ॥ याम्येन कपित्थस्याऽहिसंभवमे वुदग्जलं वाच्यम् । सप्त परित्यज्य करान् खात्वा पुरुषान् जलं पञ्च ॥ ४१ ॥ कर्बुरकोऽहिः पुरुषे कृष्णा मृत्पुटभिदपि च पाषाणः । श्वेता मृत्पश्चिमतः शिरा ततश्चोत्तरा भवति ॥ ४२ ॥ अश्मन्तकस्य वामे बदरो वा दृश्यतेऽहिनिलयो वा । षड्भिरुदक् तस्य करैः सार्धे पुरुषत्रये तोयम् ॥ ४३ ॥ कूर्मः प्रथमे पुरुषे पाषाणो धूसरः ससिकता मृत् । आदौ शिरा च याम्या पूर्वोत्तरतो द्वितीया च ॥ ४४ ॥ वामेन हरिद्रतरोर्वल्मीकश्चेत्ततो जलं पूर्वे । हस्तत्रितये पुरुषैः सत्र्यंशैः पञ्चभिर्भवति ॥ ४५ ॥ नीलो भुजगः पुरुषे मृत्पीता मरकतोपमश्चाश्मा । कृष्णा भूः प्रथमं वारुणी शिरा दक्षिणे चान्या ॥ ४६ ॥ जलरहिते

है ॥ ३८ ॥ वहां उत्तराशिरा निकलती है, जल बहुत होता है, परन्तु उसमें लोहगन्ध आता है, एक पुरुष खोदनेसे सुवर्णके रंगका मेंडक और फिर पीली मट्टी निकलती है ॥ ३९ ॥ बमईसे घिरा हुआ ताडका पेड अथवा नारियलका पेड हो तो उस वृक्षसे छः हाथ पश्चिमको चार पुरुष नीचे दक्षिणशिरा होती है ॥ ४० ॥ कैथके वृक्षसे दक्षिण वल्मीक हो तो उस वृक्षसे उत्तर सात हाथ छोडकर खोदनेसे पांच पुरुष नीचे जल मिलता है ॥ ४१ ॥ एक पुरुष नीचे चित्रवर्णका सर्प और काली मट्टी, परतदार पत्थर फिर श्वेत मृत्तिका निकलती है, पीछे उत्तराशिरा मिलती है ॥ ४२ ॥ अश्मंतकवृक्षके बांई ओर बेरका वृक्ष हो अथवा वल्मीक हो तो उस अश्मंतकवृक्षसे छः हाथ उत्तरको साढे तीन पुरुष नीचे जल होता है ॥ ४३ ॥ पहिला पुरुष खोदनेसे कछुआ, फिर धूसरवर्णका पत्थर और रेत मिली हुई मट्टी फिर पहले दक्षिणशिरा निकलती है और पीछे ईशानकोणकी शिरा निकलती है ॥ ४४ ॥ हरिद्र (हलदुआ) वृक्षकी बांई ओर वल्मीक हो तो उस वृक्षसे तीन हाथ पूर्व एक तिहाई सहित पांच पुरुष नीचे जल होता है ॥ ४५ ॥ एक पुरुष नीचे नीला सर्प, फिर पीली मट्टी, हरे रंगका पत्थर और काली भूमि निकलती है. फिर पहिले पश्चिमशिरा निकलती है और दूसरी दक्षिणशिरा निकलती है ॥ ४६ ॥ निर्जल देशमें जहां बहुत जलवाले देशके चिह्न दिखाई दें ओ

देशे दृश्यन्तेऽनूपजानि चिह्नानि। वीरणदूर्वा मृदवश्च यत्र तस्मिन् जलं पुरुषे ॥ ४७ ॥ भार्ङ्गी त्रिवृता दन्ती शूकरपादी च लक्ष्मणा चैव। नवमालिका च हस्तद्वयेऽम्बु याम्ये त्रिभिः पुरुषैः ॥ ४८ ॥ स्निग्धाः प्रलम्बशाखा वामनविटपद्रुमाः समीपजलाः। सुषिरा जर्जरपत्रा रूक्षाश्च जलेन सन्त्यक्ताः ॥ ४९ ॥ तिलकाम्रातकवरुणकभल्लातकबिल्वतिन्दुकाङ्कोलाः। पिण्डारशिरीषांजनपरूषका वञ्जुलाऽतिबलाः ॥ ५० ॥ एते यदि सुस्निग्धा वल्मीकैः परिवृतास्ततस्तोयम्। हस्तैस्त्रिभिरुत्तरतश्चतुर्भिरर्धेन च नरस्य ॥५१॥ अतृणे सतृणा यस्मिन् सतृणे तृणवर्जिता मही यत्र। तस्मिन् शिरा प्रदिष्टा वक्तव्यं वा धनं तस्मिन् ॥ ५२ ॥ कण्टक्यकण्टकानां व्यत्यासेऽम्भस्त्रिभिः करैः पश्चात्। खात्वा पुरुषत्रितयं त्रिभागयुक्तं धनं वा स्यात् ॥ ५३ ॥ नदति मही गम्भीरं यस्मिंश्चरणाहता जलं तस्मिन्। सार्धैस्त्रिभिर्मनुष्यैः कौवेरी तत्र च शिरा स्यात् ॥ ५४ ॥ वृक्षस्यैका शाखा यदि विनता भवति पाण्डुरा वा

वीरण (गांडर) और दूर्वा जहां अत्यन्त कोमल हों, वहां एक पुरुष नीचे जल होता है ॥ ४७ ॥ भारंगी, निसोत, दंती (दात्यूणी), सूकरपादी, लक्ष्मणा, मालती यह औषधे जहां हो, इनसे दो हाथ दक्षिणको तीन पुरुष नीचे जल होता है ॥ ४८ ॥ जहां स्निग्ध लंबी शाखाओंसे युक्त छोटे २ और फैले हुए वृक्ष हों, वहां जल समीप होता है और छिद्रयुक्त जर्जर पत्तोंवाले और रूखे वृक्ष जहां हों वहां जल नहीं होता ॥ ४९ ॥ जहां तिलक, अंबाडा, वरण, भिलावा, बेल, तेंदु, अंकोल, पिंडार, शिरस, अंजन, फालसा, अशोक और अतिवला ॥ ५० ॥ यह पेड अत्यन्त स्निग्ध वल्मीकोंसे घिरे हों, वहां इन वृक्षोंसे तीन हाथ उत्तर साढे चार पुरुष नीचे जल होता है ॥ ५१ ॥ जिस भूमिमें कहीं तृण न हों और बीचमें एक स्थान तृणयुक्त दिखाई दे या सब भूमिमें तृण हो और एक स्थान तृणहीन हो तो उस स्थानमें साढे चार पुरुष नीचे शिरा होती है या धन गढा होता है, यह कहना चाहिये ॥ ५२ ॥ जहां कांटेवाले वृक्षोंमें एक वृक्ष विना कांटेवाला अथवा विना कांटेवाले वृक्षोंमें एक वृक्ष कांटेवाला हो तो उस वृक्षसे तीन हाथ पश्चिमको एक तिहाई युक्त तीन पुरुष खोदनेसे जल अथवा धन निकलता है ॥ ५३ ॥ जहां पैरके ताडन करनेसे भूमिमें गंभीर शब्द हो, वहां साढे तीन पुरुष नीचे जल होता है और उत्तरशिरा निकलती है ॥५४॥ वृक्षकी एक शाखा भूमिकी ओर झुक रही हो, या पीली पड गई हो तो उस शाखाके नीचे

स्यात् । विज्ञातव्यं शाखातले जलं त्रिपुरुषं खात्वा ॥ ५५ ॥ फलकुसुम
विकारो यस्य तस्य पूर्वे शिरा त्रिभिर्हस्तैः । भवति पुरुषैश्चतुर्भिः पाषाणो
क्षितिः पीता ॥ ५६ ॥ यदि कण्टकारिका कण्टकैर्विना दृश्यते सितैः कुसुमैः
तस्यास्तलेऽम्बु वाच्यं त्रिभिर्नरैरर्धपुरुषे च ॥ ५७ ॥ खर्जूरी द्विशिरस्का य
भवेज्जलविवर्जिते देशे । तस्याः पश्चिमभागे निर्देश्यं त्रिपुरुषे वारि ॥ ५८ ॥
यदि भवति कर्णिकारः सितकुसुमः स्यात्पलाशवृक्षो वा । सव्येन तत्र हस्त
येऽम्बु पुरुषत्रये भवति ॥ ५९ ॥ ऊष्मा यस्यां धात्र्यां धूमो वा तत्र
नरयुग्मे । निर्देष्टव्या च शिरा महता तोयप्रवाहेण ॥ ६० ॥ यस्मिन् क्षेत्रे
देशे जातं सस्यं विनाशमुपयाति । स्निग्धमतिपाण्डुरं वा महाशिरा न
युगे तत्र ॥ ६१ ॥ मरुदेशे भवति शिरा यथा तथातः परं प्रवक्ष्यामि । ग्रीव
करभाणामिव भूतलसंस्थाः शिरा यान्ति ॥ ६२ ॥ पूर्वोत्तरेण पीलोर्यदि
वल्मीको जलं भवति पश्चात् । उत्तरगमना च शिरा विज्ञेया पञ्चभिः पुरु
॥ ६३ ॥ चिह्नं दर्दुर आदौ मृत्कपिलातः परं भवेद्धरिता । भवति च पुरु

तीन पुरुष खोदनेसे जल निकलता है ॥ ५५ ॥ जिस पेडके फल और पुष्पों
विकार हो, उस वृक्षसे तीन हाथ पूर्व चार पुरुष नीचे शिरा होती है, नीचे प
निकलता है और भूमि पीले पीले रंगकी होती है ॥ ५६ ॥ जहां कटेरी
कांटोंसे रहित और श्वेत पुष्पोंसे युक्त दिखा दे उसके नीचे साढे तीन पुरु
खोदनेसे जल निकलता है ॥ ५७॥ जिस निर्जल देशमें खजूरका दो शिराका
हो, वहां उस खजूरसे दो हाथ पश्चिमको तीन पुरुष नीचे जल रहता है
॥ ५८ ॥ श्वेत पुष्पवाला कर्णिकारवृक्ष अथवा ढाकका वृक्ष हो तो उस
हाथ दक्षिणको तीन पुरुष नीचे जल होता है ॥ ५९ ॥ जिस भूमिमें भाफ
धूंआ निकलता दिखाई दे तो वहां दो पुरुष नीचे बहुत जल बहनेवाली शिरा
चाहिये ॥ ६० ॥ जिस खेतमें खेती उत्पन्न होकर नाश हो जाय अथवा
स्निग्ध खेती हो या खेती उत्पन्न होकर पीली पड जाय वहां दो पुरुष
बहुतही जल होता है ॥ ६१ ॥ मारवाड देशमें जिस भांति शिरा होती है
कहते हैं. ऊंटकी ग्रीवाकी भांति भूमिमें नीची ऊंची शिरा जाती है ॥
पीलुवृक्ष (झाड) के ईशानकोणमें वल्मीक हो तो उस वल्मीकसे
चार हाथ पश्चिमको पांच पुरुष नीचे उत्तर बहनेवाली शिरा होती है ॥
वहां खोदनेमें पहिले पुरुषमें मेंडक, फिर कपिल व [illegible]

पोऽश्मा तस्य तले वारि निर्देश्यम् ॥ ६४ ॥ पीलोरेव प्राच्यां वल्मीकोऽतोऽप-
ञ्चभिर्हस्तैः । दिशि याम्यायां तोयं वक्तव्यं सप्तभिः पुरुषैः ॥ ६५॥ प्रथमे पुरुषे
भुजगः सितासितो हस्तमात्रमूर्तिश्च । दक्षिणतो वहति शिरा सक्षारं भूरि पानी-
यम् ॥ ६६ ॥ उत्तरतश्च करीराद्दहिनिलये दक्षिणे जलं स्वादु । दशभिः पुरुषै-
र्ज्ञेयं पुरुषे पीतोऽत्र मण्डूकः ॥ ६७ ॥ रोहीतकस्य पश्चादहिवासश्चेत्त्रिभिः करै-
र्याम्ये । द्वादश पुरुषान् खात्वा सक्षारा पश्चिमेन शिरा ॥ ६८ ॥ इन्द्रतरोर्व-
ल्मीकः प्राग्दृश्यः पश्चिमे शिरा हस्ते । खात्वा चतुर्दश नरान् कपिला गोधा
नरे प्रथमे ॥ ६९ ॥ यदि वा सुवर्णनाम्नस्तरोर्भवेद्वामतो भुजङ्गगृहम् । हस्त-
द्वये तु याम्ये पञ्चदशनरावसानेऽम्बु ॥ ७० ॥ क्षारं पयोऽत्र नकुलोऽर्धमानवे
ताम्रसन्निभश्चाश्मा । रक्ता च भवति वसुधा वहति शिरा दक्षिणा तत्र ॥ ७१ ॥
बदरीरोहितवृक्षौ संपृक्तौ चेद्विनापि वल्मीकम् । हस्तत्रयेऽम्बु पश्चात् षोडश-
भिर्मानवैर्भवति ॥ ७२ ॥ सुरसं जलमादौ दक्षिणा शिरा वहति चोत्तरेणान्या ।

और पत्थर निकलता है इन सब सब चिह्नोंके नीचे जल होता है ॥ ६४ ॥
पीलुवृक्षकेही पूर्वदिशामें वल्मीक हो तो उस वृक्षसे साढे चार हाथ दक्षिणको सात
पुरुष नीचे जल कहना चाहिये ॥ ६५॥ पहले पुरुषमें श्वेत कृष्ण रंगका एक हाथ
लम्बा सर्प, फिर बहुतसा खारा जल बहनेवाली दक्षिणशिरा निकलती है ॥ ६६ ॥
करीरवृक्षके उत्तर वल्मीक हो तो उस वृक्षके साढे चार हाथ दक्षिणको दश पुरुष
नीचे मधुर जल जानना चाहिये. यहां एक पुरुष खोदनेसे पीले रंगका मेंडक
निकलता है ॥ ६७ ॥ रोहीतकवृक्ष (रुहीडा) के पश्चिममें वल्मीक हो तो उस
वृक्षसे तीन हाथ दक्षिणको बारह पुरुष खोदनेसे खारा जल बहनेवाली, पश्चिम-
शिरा निकलती है ॥ ६८ ॥ अर्जुनवृक्षके पूर्वमें वल्मीक दिखाई दे तो उस वृक्षसे
एक हाथ पश्चिमको चौदह पुरुष खोदनेसे शिरा निकलती है. यहां पहिले पुरु-
षमें कपिल रंगकी गोह दिखाई देती है ॥ ६९ ॥ जो धतूरावृक्षके वामभागमें
वल्मीक हो तो उस वृक्षसे दो हाथ दक्षिणको पन्द्रह पुरुष नीचे जल होता
है ॥ ७० ॥ वह जल खारा होता है आध पुरुष नीचे न्योला और तांबेके रंगका
पत्थर, लाल रंगकी भूमि मिलती है [illegible] ॥
बेर और रुहीडा यह दोनों वृक्ष जो [illegible] उन
वृक्षोंसे तीन हाथ पश्चिमको सोलह पुरुष नीचे जल होता है ॥ ७२ ॥ यहां जल
अत्यन्त मधुर होता है. पहिले दक्षिण शिरा और पीछे दूसरी उत्तर शिरामी बहती

पिष्टनिभः पाषाणो मृच्छ्वेता वृश्चिकोऽर्धनरे ॥ ७३ ॥ सकरीरा चेद्बदरी त्रि
करैः पश्चिमेन तत्राम्भः। अष्टादशभिः पुरुषैरेशानी बहुजला च शिरा ॥७४॥
पीलुसमेता बदरी हस्तत्रयसंमिते दिशि प्राच्याम्। विंशत्या पुरुषाणामशोक्यं
तोऽत्र सक्षारम् ॥ ७५ ॥ ककुभकरीरावेकत्र संयुतौ यत्र ककुभविल्वौ वा।
हस्तद्वयेऽम्बु पश्चान्नरैर्भवेत्पञ्चविंशत्या ॥ ७६ ॥ वल्मीकमूर्धनि यदा दूर्वा
कुशाश्च पाण्डुराः सन्ति। कूपो मध्ये देयो जलमत्र नरैकविंशत्या ॥ ७७ ॥
भूमी कदम्बकयुता वल्मीके यत्र दृश्यते दूर्वा। हस्तत्रयेण याम्ये नरैः
पञ्चविंशत्या ॥ ७८ ॥ वल्मीकत्रयमध्ये रोहीतकपादपो यदा भवति। ना
वृक्षैः सहितस्त्रिभिर्जलं तत्र वक्तव्यम् ॥ ७९ ॥ हस्तचतुष्के मध्याद् षोड
भिश्चांगुलैरुदग्वारि। चत्वारिंशत्पुरुषान् खात्वाश्मातः शिरा भवति ॥ ८०॥
ग्रन्थिप्रचुरा यस्मिञ्छमी भवेदुत्तरेण वल्मीकः। पश्चात्पञ्चकरान्ते शता
संख्यकैः सलिलम् ॥ ८१ ॥ एकस्थाः पञ्च यदा वल्मीका मध्यमो भवेच्छ्वे

है. आटेके समान श्वेत रंगका पत्थर, श्वेत मृत्तिका और आध पुरुष नीचे मिर
दिखाई देता है ॥ ७३ ॥ जो करीरवृक्षके साथ वेरीका वृक्ष हो तो उन वृक्षोंसे ती
हाथ पश्चिम अठारह पुरुष खोदनेसे जल निकलता है, वहां बहुत जल वाली
ईशानाशिरा होती है ॥ ७४ ॥ पीलुवृक्षके सहित वेरका वृक्ष हो तो उनसे ती
हाथ पूर्वको बीस पुरुष नीचे खारा जल होता है, जो कभी नहीं सूखता ॥ ७५॥
जहां अर्जुनवृक्ष और करीरवृक्ष इकट्ठे हों अथवा अर्जुन वृक्ष और बेलवृक्ष
इकट्ठे हों तो उनसे दो हाथ पश्चिमको पचीस पुरुष नीचे जल होता है ॥ ७६॥
जो वल्मीकके ऊपर दूब और श्वेत रंगके कुश हों तो उस वल्मीकके नीचे इ
खोदनेसे इकीस पुरुष नीचे जल निकलता है ॥ ७७ ॥ जहांपर भूमिमें कदम
वृक्ष लगे हों और वल्मीकके ऊपर दूब दिखाई दे, वहां उस कदम्बवृक्षसे ती
दक्षिणको पचीस पुरुष नीचे जल होता है ॥ ७८ ॥ तीन वल्मीकोंके बीच
नाशके तीन वृक्षोंसे युक्त रोहीडेका वृक्ष हो तो वहां जल कहना चाहिये ॥ ७९॥
मध्यमें स्थित रोहीडेके वृक्षसे चार हाथ और सोलह अंगुल उत्तरमें चालीस पुरु
खोदनेसे पत्थर निकलता है, उसके नीचे शिरा होती है ॥ ८० ॥ जहां ग्रं
गांठोंवाला शमीवृक्ष हो और उसके उत्तर वल्मीक हो तो शमी वृक्षसे पांच
पश्चिममें पचास पुरुष नीचे जल होता है ॥ ८१ ॥ एक स्थानमें पांच वल्मी है

तस्मिन् शिरा प्रदिष्टा नरपञ्चा पञ्चवर्जितया ॥ ८२ ॥ सपलाशा यत्र शमी पश्चिमभागेऽम्बु मानवैः षष्ट्या। अर्धनरेऽहि प्रथमं सवालुका पीतमृत्परतः ॥ ८३ ॥ वल्मीकेन परिवृतः श्वेतो रोहीतको भवेद्यस्मिन्। पूर्वेण हस्तमात्रे सप्तत्या मानवैरम्बु ॥ ८४ ॥ श्वेता कण्टकबहुला यत्र शमी दक्षिणेन तत्र पयः। नरपञ्चकसंयुतया सप्तत्याहिर्नरार्धे च ॥ ८५ ॥ मरुदेशे यच्चिह्नं न जाङ्गले तैर्जलं विनिर्देश्यम्। जम्बूवेतसपूर्वे ये पुरुषास्ते मरौ द्विगुणाः ॥८६॥ जम्बूस्त्रिवृता मूर्वा शिशुमारी सारिवा शिवा श्यामा। वीरुधयो वाराही ज्योतिष्मती च गरुडवेगा ॥ ८७ ॥ सूकरिकमाषपर्णी व्याघ्रपदाश्चेति यद्यहेर्निलये। वल्मीकादुत्तरतस्त्रिभिः करैस्त्रिपुरुषे तोयम् ॥ ८८ ॥ एतदनूपे वाच्यं जाङ्गलभूमौ तु पञ्चभिः पुरुषैः। एतैरेव निमित्तैर्मरुदेशे सप्तभिः कथयेत् ॥ ८९ ॥

उनके मध्यका वल्मीक श्वेत वल्मीकमें पचपन पुरुष खोदनेसे जलकी शिरा निकलती है ॥ ८२ ॥ जहां पलाशवृक्षयुक्त शमी वृक्ष हों, वहां उन वृक्षोंसे पांच हाथ पश्चिम साठ पुरुष नीचे जल होता है. प्रथम आध पुरुष खोदनेसे सर्प और पीछे वालू मिली हुई पीली मट्टी निकलती है ॥ ८३ ॥ जहां वल्मीकसे घिरा हुआ श्वेत रंगका रुहीडेका वृक्ष हो वहां उस वृक्षसे एक हाथ पूर्वको सत्तर पुरुष नीचे जल होता है ॥ ८४ ॥ जहां बहुत कांटोंसे युक्त श्वेत शमीवृक्ष हो, वहां उस वृक्षसे एक हाथ दक्षिणको पचहत्तर पुरुष नीचे जल होता है और आध पुरुष खोदनेपर सर्प निकलता है ॥ ८५ ॥ मरुदेशमें जलज्ञानके जो यह चिह्न कहे इन चिह्नोंसे जांगलदेशमें जल नहीं कहना चाहिये अर्थात् जांगल देशमें इन चिह्नोंसे जलका ज्ञान नहीं होता. जामन, वेदमजनूं आदि वृक्षोंके चिह्नोंसे प्रथम जलज्ञान कहा, वह चिह्न मरुदेशमें दिखाई दे तो जितने पुरुष नीचे पहले उन चिह्नोंसे जल कहा, वे पुरुष यहांपर दूने कहने योग्य है. बहुतही जलवाले देशको अनूपक कहते हैं, जलके अभाववाला देश मरुस्थल कहाता है, इन दोनोंसे अलग जो देश हो अर्थात् जहां बहुत अधिक और अत्यन्त कम जल न होवे, वह जांगल देश है. इस भांति तीन प्रकारके देश होते हैं ॥ ८६ ॥ जामन, निसोत, मूर्वा, शिशुमार, शारिवन, शिवा, श्यामा, वाराहीकंगनी, गरुडवेगा ॥ ८७ ॥ सूकरिका, मषवन और व्याघ्रपदा (बघनखी) यह औषधी जो वल्मीकके ऊपर हों तो उस वल्मीकसे तीन हाथ उत्तरको तीन पुरुष नीचे जल होता है ॥ ८८ ॥ तीन पुरुष नीचे जलकी बात अनूप देशमें कहनी चाहिये. जो यह चिह्न जांगलदेशमें

एकनिभा यत्र मही तृणतरुवल्मीकगुल्मपरिहीना । तस्यां यत्र विकारो भ
धरित्र्यां जलं तत्र ॥ ९० ॥ यत्र स्निग्धा निम्ना सवालुका सानुनादिनी
स्यात् । तत्रार्धपञ्चमैर्वारि मानवैः पञ्चभिर्यदि वा ॥ ९१ ॥ स्निग्धतरूणां द
नरैश्चतुर्भिर्जलं प्रभूतं च । तरुगहनेऽपि हि विकृतो यस्तस्मात्तद्वदेव वदेत् ॥९२
नमते यत्र धरित्री सार्धे पुरुषेऽम्बु जाङ्गलानूपे । कीटा वा यत्र विनालयेन ब
र्षोऽम्बु तत्रापि ॥ ९३ ॥ उष्णा शीता च मही शीतोष्णाम्भस्त्रिभिर्नरैः सार्धे
इन्द्रधनुर्मत्स्यो वा वल्मीको वा चतुर्हस्तात् ॥ ९४ ॥ वल्मीकानां पंक्त्यां
यद्येकोऽभ्युच्छ्रितः शिरा तदधः । शुष्यति न रोहते वा सस्यं यस्यां च त
ऽम्भः ॥ ९५ ॥ न्यग्रोधपलाशोदुम्बरैः समेतैस्त्रिभिर्जलं तदधः । वटपिप्पल

दिखाई दें तो तीन पुरुषके स्थानमें पांच पुरुष नीचे जल कहे. इनही चिह्नों
मरुस्थलमें देखनेसे सात पुरुष नीचे जल बतावे ॥ ८९ ॥ एकरंगकी भूमिमें जहां
तृण, वृक्ष, वल्मीक और गुल्म नहीं हों, ऐसी भूमि जहां विकारयुक्त अर्थात् और
प्रकारकी दिखाई दे, वहां पांच पुरुष नीचे जल होता है (भूमिमें एकही ठौर
बहुतसी शाखायुक्त समूहके उत्पन्न होनेको गुल्म कहते हैं) ॥ ९० ॥
जहां स्निग्ध नीची वालु रेतदार या जहां पैर रखनेसे शब्द हो, ऐसी भूमि हो तो
वहां साढे चार पुरुष नीचे अथवा पांच पुरुष नीचे जल होता है ॥ ९१ ॥ ज
बहुतसे स्निग्ध वृक्ष हों, वहां उन वृक्षोंसे दक्षिण चार पुरुष नीचे बहुतसे जल
होना कहना चाहिये और बहुतसे वृक्षोंमें एक वृक्ष विकृत हो अर्थात् उसके फल
पुष्प औरही प्रकारके हों तो उस वृक्षसे दक्षिणको चार पुरुष नीचे जल होता है ॥ ९२ ॥
जिस जांगल या जिस अनूप देशमें पांव रखनेसे भूमि दब जाय वहां डेढ पु
नीचे जल होता है और जहां बहुतसे कीडे दिखाई दें और उनके रहनेका घ
मट्टक न हो वहांभी डेढ पुरुष नीचे जल होता है ॥ ९३ ॥ जहां सब भूमि गर
हो और एक देशमें ठण्डी हो वहां या जहां सब भूमि शीतल हो और एक देशमें
गरम हो वहां साढे तीन पुरुष नीचे जल रहता है, इन्द्रधनुष, मत्स्य या वल्मी
जहां जांगल अथवा अनूप देशमें दिखाई दे, वहां चार हाथ नीचे जल होता
॥ ९४ ॥ जहां जांगल या अनूप देशमें बहुतसे वल्मीकोंकी पांति हो, उसमें ए
वल्मीक सबसे ऊंचा हो तो उस ऊंचे वल्मीकके नीचे चार हाथ खोदनेसे शिरा
निकलती है और जहां खेती जमकर सूख जाय या जमेही नहीं, वहांभी चार पु
नीचे जल होता है ॥ ९५ ॥ बड, पीपल और गूलर यह तीन वृक्ष जहां इकट्ठे

वाये तद्वद्वाच्यं शिरा चोदक् ॥ ९६ ॥ आग्नेये यदि कोणे ग्रामस्य पुरस्य वा भवति कूपः। नित्यं स करोति भयं दाहं च समानुषं प्रायः ॥ ९७ ॥ नैर्ऋतकोणे बालक्षयं वनिताभयं च वायव्ये। दिक्त्रयमेतत्त्यक्त्वा शेषासु शुभावहाः कूपाः ॥ ९८ ॥ सारस्वतेन मुनिना दकार्गलं यत्कृतं तदवलोक्य। आर्याभिः कृतमेतद् वृत्तैरपि मानवं वक्ष्ये ॥ ९९ ॥ स्निग्धा यतः पादपगुल्मवल्यो निश्छिद्रपत्राश्च ततः शिरास्ति। पद्मेक्षुरोशीरकुलाः सगुण्ड्राः काशाः कुशा वा नलिका नलो वा ॥ १०० ॥ खर्जूरजम्ब्वर्जुनवेतसाः स्युः क्षीरान्विता वा द्रुमगुल्मवल्यः। छत्रेभनागाः शतपत्रनीपाः स्युर्नक्तमालाश्च ससिन्दुवाराः ॥ १०१ ॥ विभीतको वा मदयन्तिका वा यत्रास्ति तस्मिन् पुरुषत्रयेऽम्भः। स्यात्पर्वतस्योपरि पर्वतोऽन्यस्तत्रापि मूले पुरुषत्रयेऽम्भः ॥ १०२ ॥ या मौञ्जकैः काशकुशैश्च युक्ता नीला च मृद्यत्र सशर्करा च। तस्यां प्रभूतं सुरसं च तोयं कृष्णा-

वहां इन वृक्षोंके नीचे तीन हाथ खोदनेसे जल निकलता है और जहां वड, पीपल दोनों इकट्ठे हों, उनकेभी तीन हाथ नीचे खोदनेसे जल निकलता है. इन दोनों स्थानोंमें उत्तर शिरा होती है ॥ ९६ ॥ गांवसे अथवा नगरसे अग्निकोणमें कुआँ हो तो नित्य भय देता है और प्रायः ग्राम और नगरमें अग्नि लगती है, जिसमें मनुष्यभी जल जाते हैं ॥ ९७ ॥ नैर्ऋत्यकोणमें कुआँ हो तो बालकोंका क्षय होता है. वायव्यकोणमें कूप हो तो स्त्रियोंको भय होता है. यह तीन दिशा छोडकर बाकी पांच दिशाओंमें कूप शुभ होते हैं ॥ ९८ ॥ सारस्वतमुनिने जो उदकार्गल कहा है, वह देखकर यह उदकार्गल हमने आर्याछन्दके द्वारा कहा. अब मनुका कहा उदकार्गलभी वृत्तोंमें कहते हैं ॥ ९९ ॥ वृक्ष, गुल्म और वल्ली जिस भूमिमें स्निग्ध हों और छिद्रहीन पत्तोंसे युक्त हों, वहां तीन पुरुष नीचे शिरा होती है या रक्तपद्म, गोखरू, खस, कुल, गंड्र (शर), काश, कुश, नालिका, नल यह तृण ॥ १०० ॥ और खजूर, जामन, अर्जुन, वेतस वृक्ष हों या जहां वृक्ष, गुल्म और वल्ली ऐसे हों, जिनमें दूध निकले अथवा छत्री, हस्तिकर्णी, नागकेसर, कमल, कदम्ब, नक्तमाल, सिंधुवार ॥ १०१ ॥ बहेडे और मदयन्तिका जहां हो वहां तीन पुरुष नीचे जल होता है और जहां एक पर्वतके ऊपर दूसरा पर्वत हो वहांभी ऊपरके पर्वतके मूलमें तीन पुरुष नीचे जल होता है ॥ १०२ ॥ मूंज, काश और कुश करके जो भूमि युक्त हो; जहां पत्थरकी कणिकाओंसे मिली नीली मट्टी हो तो वहां बहुत और मीठा जल होता है, जहां काली या लाल

थवा यत्र च रक्तमृद्वा ॥ १०३ ॥ सशर्करा ताम्रमही कषायं क्षा
कपिला करोति । आपाण्डुरायां लवणं प्रदिष्टं मिष्टं ...
॥ १०४ ॥ शाकाश्वकर्णार्जुनबिल्वसर्जा श्रीपर्ण्यरिष्टाधवशिंशपा
पर्णैर्द्रुमगुल्मवल्यो रूक्षाश्च दूरेऽम्बु निवेदयन्ति ॥ १०५ ॥ सूर्या
रानुवर्णा या निर्जला सा वसुधा प्रदिष्टा । रक्तांकुराः क्षीरयुताः क
धरा चेज्जलमश्मनोऽधः ॥ १०६ ॥ वैदूर्यमुद्गाम्बुदमेचकाभा पक्
म्बरसन्निभा वा । भृङ्गाञ्जनाभा कपिलाथवा या ज्ञेया शिला भूरि
॥ १०७ ॥ पारावतक्षौद्रघृतोपमा वा क्षौमस्य वस्त्रस्य च तुल्या
सोमवल्याश्च समानरूपा साप्याशु तोयं कुरुतेऽक्षयं च ॥ १०८ ॥
समेता पृषतैर्विचित्रैरापाण्डुभस्मोष्ट्रखरानुरूपा । भृङ्गोपमांगुष्ठिक
सूर्याग्निवर्णा च शिला वितोया ॥ १०९ ॥ चन्द्रातपस्फटिकमौ

मही हो वहांभी बहुत और मधुर जल होता है ॥ १०३ ॥ शर्करा (
कणोंसे मिली हुई तांबेके रंगकी) भूमि हो तो उसमें कषैले स्वादका जल
है. कपिल रंगकी भूमिमें खारा पानी होता है. पाण्डुरंगकी भूमिमें
स्वादका जल निकलता है और नीले रंगकी भूमिमें मीठा जल होता है ॥
शाक, अश्वकर्ण, अर्जुन, बिल्व, सर्ज, श्रीपर्णी, अरिष्ट, और शीशम
जहां छेदवाले पत्तोंसे युक्त हों और जहां वृक्ष, गुल्म, बेलेंभी छिद्रवाले
और रूखी हों वहां जल बहुत दूर होता है ॥ १०५॥ जो भूमि सूर्य, अग्नि
ऊंट, गर्दभके रंगकी हो वह भूमि जलहीन होती है और जिस स्थल
लाल रंगके अंकुरोंदार करीर वृक्ष हों और उन वृक्षोंमें दूध निकलता हो
रके नीचे जल होता है ॥ १०६ ॥ वैदूर्य मणि, मुद्ग (मूंग) और मेघ
जो शिला कृष्णवर्ण हो व पके हुए गूलरके समान रंग हो, जो शिला भौंरों
समान अञ्जनके रंगकी निकले या कपिल वर्ण हो उस शिलाके निकट
जल होता है ॥ १०७ ॥ जो शिला पारावत (कबूतर), शहद, घी,
कपड़ा या जो यज्ञके पानमें आनेवाली सोमबेलकी समान रंगकी हो
जल्दी अक्षय जल करती है ॥ १०८ ॥ तांबेके रंगके चित्र
बिन्दुओंसे युक्त जो शिला हो, पांडुरंगकी हो, अंगुष्ठिकाके
और ऊंट हो, सूर्य या अग्निके समान रंगकी हो उस शिलाके
होता है ॥ १०९ ॥ चन्द्रमाकी चांदनी, स्फटिक, मोती, सुवर्ण और

पाश्वेन्द्रनीलमणिहिंगुलकाञ्जनाभाः । सूर्योदयांशुहरितालनिभाश्च याः ...ाः शोभना मुनिवचोऽत्र च वृत्तमेतत् ॥ ११० ॥ एता ह्यभेद्याश्च शिलाः ...श्च यक्षैश्च नागैश्च सदाभिजुष्टाः । येषां च राष्ट्रेषु भवन्ति राज्ञां तेषामवृ...ष्टिभयं करोति ॥ १११ ॥ भेदं यदा नैति शिला तदानीं पालाशकाष्ठैः ...तिन्दुकानाम् । प्रज्वालयित्वानलमग्निवर्णा सुधाम्बुसिक्ता प्रविदारमेति ॥ ११२ ॥ तोयं शृतं मोक्षकभस्मना वा यत्सप्तकृत्वः परिषेचनं तत् । कार्यं ...क्षारयुतं शिलायाः प्रस्फोटनं वह्निवितापितायाः ॥ ११३ ॥ तक्रकाञ्जिक...ः सकुलत्था योजितानि बदराणि च तस्मिन् । सप्तरात्रमुषितान्यभितप्तां ...यन्ति हि शिलां परिषेकैः ॥ ११४ ॥ नैम्बं पत्रं त्वक् च नालं तिलानां ...ामार्गं तिन्दुकं स्याद्गुडूची । गोमूत्रेण स्रावितः क्षार एषां षट्कृत्वोऽस्ता...ो भिद्यतेऽश्मा ॥ ११५ ॥ आर्कं पयो हुडुविषाणमषीसमेतं पारावता-

...गेके समान रंगकी जो शिला हो, सिंगरफके समान बहुत लाल रंगकी या अंजनके ...मान बहुत काली, उदय होते हुए सूर्यके किरणोंकी समान बहुत लाल और ...मकदार हो अथवा हरितालके तुल्य पीले रंगकी शिला हो तो वह शुभ होती है. ... प्रकरणमें आगे कहा हुआ वृत्त मुनिवचन है अर्थात् प्रामाणिक है ॥ ११० ॥ ...ले जो शिला कही यह सब शुभ हैं, इसलिये इन शिलाओंको तोडना योग्य ...हीं. यह शिला सदा यक्ष और नागोंसे सेवित रहती हैं, जिन राजाओंके राज्यमें ...सी शिला हो उनके राज्यमें कभी अवृष्टि नहीं होती ॥ १११ ॥ कूप आदि ...ोदनेके समय शिला निकल आवे और वह फूट न सके तो उसके ऊपर ढाक ...ौर तेंदूके काठको जलायकर उस शिलाको लाल कर ले फिर उसके ऊपर चूनेकी ...लीसे मिला हुआ जल छिडके तो वह शिला टूट जाती है ॥ ११२ ॥ मरुवा ...सकी भस्म मिलाय जलको औटावे फिर उसमें शरका खार मिला पीछे अग्निसे ...पाई हुई शिलाके ऊपर सात वार उस जलको छिडके तो शिला टूट जाती है ॥ ११३ ॥ छाछ, कांजी, मद्य, कुलथी और बेरके फल इन सबको एक बरतनमें ...ात रात्रि रक्खे फिर शिलाको पहले कही कई रीतिसे तपाय इन वस्तुओंसे वार ...ार छिडके तो वह शिला टूट जाती है ॥ ११४ ॥ नींबके पत्ते, नींबकी छाल, ...तिलोंका नाल, अपामार्ग (चिरचिटा), तेंदूके फल गिलोय इनकी भस्मको ...ोमूत्रसे छान ले फिर पत्थरको तपायकर छः वार इसमें छिडके तो वह पत्थर टूट ...ाता है ॥ ११५ ॥ दुडुमेषके सींगको जलायकर उसकी स्याही कबूतर और चूहेकी

खुराकृता च युतं प्रलेपः । टङ्कस्य तैलमथितस्य ततोऽस्य पानं पश्चाच्छितस्य न शिलासु भवेद्विघातः ॥ ११६ ॥ क्षारे कदल्या मथितेन युक्ते दिनोषिते पायितमायसं यत् । सम्यक् छितं चाश्मनि नैति भङ्गं न चान्यलोहेष्वपि तस्य कौण्ठ्यम् ॥ ११७ ॥ वापी प्रागपरायताम्बु सुचिरं धत्ते न याम्योत्तरा कल्लोलैरवदारमेति मरुता सा प्रायशः प्रेरितैः । तां चेदिच्छति सारदारुभिरपां संपातमावारयेत् पाषाणादिभिरेव वा प्रतिचयं क्षुण्णं द्विपाश्वादिभिः ॥ ११८ ॥ ककुभवटाम्रप्लक्षकदम्बैः सनिचुलजम्बूवेतसनीपैः । कुरवकतालाशोकमधूकैः बकुलविमिश्रैश्चावृततीराम् ॥ ११९ ॥ द्वारं च नैर्वाहिकमेकदेशे कार्यं शिलासञ्चितवारिमार्गम् । कोशस्थितं निर्विवरं कपाटं कृत्वा ततः पांशुभिरावपेत्तम् ॥ १२० ॥ अञ्जनमुस्तोशीरैः सराजकोशातकामलकचूर्णैः । कतकफलसमायुक्तैर्योगः कूपे प्रदातव्यः ॥ १२१ ॥ कलुषं कटुकं लवणं विरसं सलिलं

बीटके साथ पीसकर मिला ले और इन सबको आकके दूधमें डालकर लेप करे शस्त्रपर लगावे और फिर तेलसे मथित टंक (पाषाणदारकयंत्र) पर पान देकर तीक्ष्ण कर ले. शिलापर मारनेसेभी इस शस्त्रकी धार नहीं टूटेगी ॥११६॥ कदलीके क्षारमें छाछ मिलाकर एक दिन रहने दे फिर जिस लोहेमें उसको मिलाकर पान दी जाय और वह भलीभांतिसे तेज धारवाला हो जाय तो फिर वह पत्थरपरभी मारनेसे नहीं टूटता और लोहेपर लगनेसे भी खुटला नहीं होता ॥ ११७ ॥ पूर्व पश्चिमको लम्बी वापीमें जल बहुत कालतक रहता है और दक्षिण उत्तरको लंबी नहीं ठहरता क्योंकि पवनसे उठाये हुए बडे तरंगोंसे वह टूट जाती है; जो दक्षिण उत्तर लंबी पुष्करणी बनाया चाहे तो जलकी चोटका बचाव करनेके लिये उसके किनारोंको दृढ काष्ठसे बांध दे या पत्थर, ईंट आदिसे चिनवा दे और बनानेके समय उसके प्रत्येक मिट्टीके आसारको घोडे हाथी आदिसे रुंदवाता जाय, जिससे वह मिट्टी दब जाय और जलके धक्केसे नहीं टूटे ॥ ११८ ॥ अर्जुन, वड, आम, पिलखन, कदम्ब, निचुल, जामुन, वेतस, नीम (एक प्रकारका कदम्ब), कुरवक, ताल, अशोक, महुआ और मौलसिरी ये वृक्ष उस वापीके तटपर लगावे ॥ ११९ ॥ जल निकलनेके लिये एक ओर एक मार्ग रक्खे. जिसको पत्थरोंसे बँधवाकर दृढ कर देवे और उस मार्गको छिद्ररहित काठके तख्तेसे ढककर ऊपरसे मिट्टीसे दृढ कर दे ॥ १२० ॥ अंजन (सुरमा), मोथा, खस, राजकोशातकी (बडी तुरई), आमले और कतक (निर्मल) इन सबका चूर्ण कर कूपमें डाले ॥ १२१ ॥ जो ...

यदि वा शुभगन्धि भवेद् । तदनेन भवत्यमलं सुरसं सुसुगन्धिगुणैरपरैश्च युतम् ॥ १२२ ॥ हस्तो मघानुराधापुष्यधनिष्ठोत्तराणि रोहिण्यः । शतभिष-गित्यारम्भे कूपानां शस्यते भगणः ॥ १२३ ॥ कृत्वा वरुणस्य बलिं वटवेत-सकीलकं शिरास्थाने । कुसुमैर्गन्धैर्धूपैः सम्पूज्य निधापयेत्प्रथमम् ॥ १२४ ॥ मेघोद्भवं प्रथममेव मया प्रदिष्टं ज्येष्ठामतीत्य बलदेवमतादि दृष्ट्वा । भौमं दकार्गलमिदं कथितं द्वितीयं सम्यग्वराहमिहिरेण मुनिप्रसादात् ॥ १२५ ॥

इति श्रीवराहमिहिरकृतौ बृहत्सं० दकार्गलं नाम चतुःपञ्चाशत्तमोऽध्यायः॥५४॥

अथ पंचपंचाशत्तमोऽध्यायः ।

वृक्षायुर्वेद.

प्रान्तच्छायाविनिर्मुक्ता न मनोज्ञा जलाशयाः । यस्मादतो जलप्रान्तेष्वारामान् विनिवेशयेत् ॥ १ ॥ मृद्वी भूः सर्ववृक्षाणां हिता तस्यां तिलान् वपेत् ।

गदला, कडुआ, खारा, बेस्वाद या दुर्गन्धदार हो तो वह इस चूर्णके डालनेसे निर्मल, मीठा, सुगन्ध और भी कई उत्तम गुणों करके युक्त हो जाता है ॥ १२२ ॥ हस्त, मघा, अनुराधा, पुष्य, धनिष्ठा, तीनों उत्तरा, रोहिणी और शतभिषा नक्षत्रमें कूपका आरंभ करना श्रेष्ठ है ॥ १२३ ॥ वरुणको बलि देकर गंध, पुष्प, धूप आदिसे वड या वेतके काठके कीलका पूजन करे फिर शिराके स्थानमें प्रथम उस कीलको गाड दे ॥ १२४ ॥ ज्येष्ठकी पूर्णिमा होनेसे पीछे वर्षाऋतुमें जो जलका ज्ञान है वह मेघसम्बन्धी उदकार्गल है, वह हमने बलदेव आदि आचार्योंके मतको देखकर पहलेही कह दिया, वह भूमिसम्बन्धी दूसरा उदकार्गल मुनियोंके प्रसादसे भलीभांति वराहमिहिरने अर्थात् हमने कहा है, उदक शब्द जलका वाचक है और अर्गल रुकावटका नाम है, जलकी रुकावट जिस शास्त्रसे जानी जावे वह उदकार्गल कहाता है " नारं नीरं भुवनमुदकं जीवनीयं दकं च " इति हलायुधः ॥ १२५ ॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां भाषाटी० चतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥

वापी, कूप, तालाब आदि जलाशयके और पास जो छायासे हीन हो तो चित्तको आनंद नहीं देवे, इस कारण जलाशयोंके किनारोंपर आराम (बगीचे) लगावें ॥ १ ॥ कोमल भूमि सब वृक्षोंके लिये अच्छी होती है, जिस भूमिमें बाग

१ अत्र श्लोकोऽयं प्रक्षिप्तष्टीकायामनुल्लेखात् ।

पुष्पितांस्तांश्च गृह्णीयात् कर्मैतत्प्रथमं भुवि ॥ २ ॥
सप्रियङ्गवः । मङ्गल्याः पूर्वमारामे रोपणीया गृहेषु वा ॥ ३ ॥ पनसाशोक
दलीजम्बूलकुचदाडिमाः । द्राक्षापालीवताश्चैव बीजपूरातिमुक्तकाः ॥
एते द्रुमाः काण्डा रोप्या गोमयेन प्रलेपिताः । मूलच्छेदेऽथ वा स्कन्धे
णीयाः प्रयत्नतः ॥ ५ ॥ अजातशाखांश्छिशिरे जातशाखान् हिमागमे ।
गमे च सुस्कन्धान्यथादिक् प्रतिरोपयेत् ॥ ६ ॥
गोमयैः । आमूलस्कन्धलिप्तानां सङ्क्रामणविरोपणम् ॥ ७ ॥
पूजां कृत्वा स्नानानुलेपनैः । रोपयेद्रोपितश्चैव पत्रैस्तैरेव जायते ॥ ८ ॥
प्रातश्च घर्मान्ते शीतकाले दिनान्तरे । वर्षासु च भुवः शोषे सेक्तव्या
द्रुमाः ॥ ९ ॥ जम्बूवेतसवानीरकदम्बोदुम्बरार्जुनाः । ...
चाश्च सदाडिमाः ॥ १० ॥ वञ्जुलो नक्तमालश्च तिलकः पनसस्तथा । ति
रोऽम्रातकश्चैव षोडशानूपजाः स्मृताः ॥ ११ ॥ उत्तमं विंशतिर्हस्ता ...

लगाना हो पहिले उसमें तिल बोवे, जब वे तिल फूलें तब उनका मर्दन क
भूमिका प्रथम कर्म है ॥ २ ॥ नींव, अशोक, पुन्नाग, शिरिष और प्रियंगु मंगल
हैं इस कारण बागमें अथवा घरमें पहिले लगाने चाहिये ॥ ३ ॥ कटहर, अ
केला, जामुन, लिकुच (बडहर), दाडिम, दाख, पालीवत, बिजौरा और
इन वृक्षोंकी कलम लेकर उसको गोबरसे लीपकर या दूसरे वृक्षको मूलसे
डालसे काट उसके ऊपर लगावे ॥ ४ ॥ ५ ॥ जिनके शाखा उत्पन्न नहीं
हों ऐसे वृक्षोंको एक स्थानसे उठाकर दूसरे स्थानमें अपनी दिशाके बीच
ऋतुमें लगावे. जिनके शाखा हो गई हों उनको हेमंतमें और अच्छे २ डाल
वृक्षोंको वर्षाऋतुमें लगावे ॥ ६ ॥ घृत, खस, तिल, शहत, वायविडंग, दूध
गोबर इन सबको पीसकर मूलसे लेकर डालतक वृक्षोंको लेप दे पीछे
एक स्थानसे उठाकर दूसरे स्थानमें लगावे ॥ ७ ॥ पवित्र हो, स्नान अनुलेपन
वृक्षकी पूजा करे पीछे उस वृक्षको दूसरे स्थानमें लगावे तो वह वृक्ष उन्हीं
करके युक्त लग जाता है अर्थात् सूखता नहीं ॥ ८ ॥ लगाये हुए वृक्षोंमें ग्रीष्म
सांझ सवेरे दोनों समय सींचने चाहिये; शीतकालमें एक दिनके अंतरसे
और वर्षाऋतुमें भूमि सूखनेपर सींचना चाहिये ॥ ९ ॥ जामुन, बेतस,
कदम्ब, गूलर, अर्जुन, बिजौरा, दाख, बडहर, दाडिम ॥ १० ॥ वंजुल, नक्तमाल
तिलक, कटहर, तिमिर और अंबाडा यह सोलह वृक्ष अनूपज अर्थात् बहुत
वाले देशमें होते हैं ॥ ११ ॥ एक वृक्षसे बीस हाथके अंतरपर दूसरा वृक्ष

गान्तरम्। स्थानात् स्थानान्तरं कार्यं वृक्षाणां द्वादशावरम् ॥ १२ ॥
यासन्नजातास्तरवः संस्पृशन्तः परस्परम्। मिश्रैर्मूलैश्च न फलं सम्यग्यच्छन्ति
डिताः ॥ १३ ॥ शीतवातातपै रोगो जायते पाण्डुपत्रता। अवृद्धिश्च
लानां शाखाशोषो रसस्रुतिः ॥ १४॥ चिकित्सितमथैतेषां शस्त्रेणादौ विशो-
म्। विडङ्गघृतपङ्काक्तान् सेचयेत् क्षीरवारिणा ॥ १५ ॥ फलनाशे कुल-
श्च माषैर्मुद्गैस्तिलैर्यवैः। शृतशीतपयःसेकः फलपुष्पाभिवृद्धये ॥ १६ ॥
विकाजशकृच्चूर्णस्याढके द्वे तिलाढकम्। सक्तुप्रस्थो जलद्रोणो गोमांसतु-
या सह ॥ १७ ॥ सप्तरात्रोषितैरेतैः सेकः कार्यो वनस्पतेः। वल्लीगुल्मलतानां
फलपुष्पाय सर्वदा ॥ १८ ॥ वासराणि दश दुग्धभावितं बीजमाज्ययुतह-
तयोजितम्। गोमयेन बहुशो विरूक्षितं क्रौडमार्गपिशितैश्च धूपितम् ॥ १९ ॥
मत्स्यशूकरवसासमन्वितं रोपितं च परिकर्मितावनौ। क्षीरसंयुतजलावसेचितं

जाय तो उत्तम है, सोलह हाथ अंतरपर मध्यम और बारह हाथके अंतरपर लगाया जाय तो अधम होता है ॥ १२ ॥ जो वृक्ष बहुत समीप उत्पन्न हो, परस्पर स्पर्श करे और जिनकी जड मिल जावें वे पीडित होते हैं और इसी कारणसे भलीभांति नहीं फलते ॥ १३ ॥ बहुत शीत पवन और धूपसे वृक्षोंको रोग हो जाता है; तब उनके पत्ते पीले हो जावे, अंकुर नहीं बढते, डाली सूखती और रस टपकने लगता है ॥१४॥ रोगी वृक्षकी इस भांति चिकित्सा करे कि पहले जिस अंगको सडा सूखा आदि देखे उसको शस्त्रसे काट देवे फिर वायविडंग घृत और कीचको मिलाय-कर वृक्षोंके लेप करे पीछे दूध मिले जलसे सींचे ॥ १५ ॥ वृक्षमें फल न लगे तो कुलथ, उडद, मूंग, तिल और जौ दूधमें डालकर औटावे, फिर उस दूधको ठंडा कर उस दूधसे फल और पुष्पोंकी वृद्धिके लिये वृक्षको सींचे ॥ १६ ॥ भेड और बकरीकी मेंगनका चूर्ण दो आढक, तिल एक आढक, सत्तू एक प्रस्थ, जल एक द्रोण और गोमांस एक तुला इन सबको एक पात्रमें डालकर ॥ १७ ॥ सात रात्रितक रक्खे, पीछे फल और पुष्पोंके लिये इस जलसे वृक्ष, बेल, गुल्म और लताओंको सींचे ॥ १८ ॥ चाहे जिस वृक्षके बीजको घृतसे चिकने हाथ करके चुपडे पीछे उसको दूधमें डाल दे इसी भांति नित्य दश दिनतक चिकने हाथसे चुपड दूधमें डालता जाय पीछे उसको गोबरसे बहुत बार रूखा करे, सूअर और हरिणके मांसकी उस बीजको धूप देवे ॥ १९ ॥ फिर मत्स्य और सूकरकी

जायते कुसुमयुक्तमेव तत् ॥ २० ॥ तिन्तिडीत्यपि करोति [illegible]
तिलचूर्णतक्रुतैः । पूतिमांससहितैश्च सेचिता धूपिता च सततं [illegible]
कपित्थवल्लीकरणाय मूलान्यास्फोतधात्रीधववासिकानाम् । [illegible]
सूर्यवल्ली श्यामातिमुक्तैः सहिताष्टमूली ॥ २२ ॥ क्षीरे शृते [illegible]
नाञ्शतं स्थाप्य कपित्थबीजम् । दिने दिने शोषितमर्क[illegible]
ततोऽधिरोप्यम् ॥ २३ ॥ हस्तायतं तद्द्विगुणं गभीरं खात्वावटं [illegible]
शुष्कं प्रदग्धं मधुसर्पिषा तत् प्रलेपयेद्भस्मसमन्वितेन ॥ २४ ॥ [illegible]
तिलैर्यवैश्च प्रपूरयेन्मृत्तिकयान्तरस्थैः । मत्स्यामिषाम्भःसहितं च [illegible]
नत्वं समुपागतं तत् ॥ २५ ॥ उप्तं च बीजं चतुरंगुलाधो मत्स्य[illegible]
लैश्च सिक्तम् । वल्ली भवत्याशु शुभप्रवाला विस्मापनी मण्डप[illegible]

[illegible] (वर्षी) सहित उस बीजको तिल बोनेसे पुष्प भी [illegible]
[illegible] तो उस बीजसे जो वृक्ष उत्पन्न होगा [illegible]
[illegible] ॥ २० ॥ [illegible] जो अतिकठोर होता है [illegible]
[illegible] और [illegible] हुआ मांस इन सबसे [illegible]
[illegible] अंकुर निकल आते, [illegible]
[illegible]

...ङ्कोलसम्भूतफलकल्केन भावितम् । एतत्तैलेन वा बीजं श्लेष्मातकफलेन
॥ २७ ॥ वापितं करकोन्मिश्रं मृदि तत्क्षणजन्मकम् । फलभारान्विता
भवतीति किमद्भुतम् ॥ २८ ॥ श्लेष्मातकस्य बीजानि निष्कुलीकृत्य
...द् भागतः । अङ्कोलविज्जलाद्भिश्छायायां समकृत्त्वेवम् ॥ २९ ॥ माहिष-
...शकृद्धृष्टान्यस्य करीषे च तानि निक्षिप्य । करकाजलमृद्योगे न्युप्तान्यह्ना
...फलानि ॥ ३० ॥ ध्रुवमृदुमूलविशाखा गुरुभं श्रवणस्तथाश्विनीहस्तम् ।
...नि दिव्यदृग्भिः पादपसंरोपणे भानि ॥ ३१ ॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां वृक्षायुर्वेदो नाम
पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

...से सींचे तौ शीघ्रही उत्तम पत्तों करके युक्त वली हो जावे और मंडपको ढक
...जिसको देखनेसे सबको विस्मय हो ॥ २६ ॥ अंकोलवृक्षके फलके कल्क
...) से, अंकोलफलके तेलसे अथवा लसोडेके फलसे अर्थात् उसके कल्कसे
...या तेलसे चाहे जिस बीजको सौ भावना देवे अर्थात् सौ बार भिजोवे ॥ २७ ॥
... उसे ओलोंसे भीगी हुई मिट्टीमें बोवे तो उसी क्षण जम आता है, फूलोंके
...से झुकी हुई लता हो जाती है इसमें क्या अद्भुत है अर्थात् अवश्यही होती
... २८ ॥ बुद्धिमान् मनुष्य लसोडेके बीज लेकर उनका छिलका उतारे और
...अंकोलफलकी विजली अर्थात् फलके भीतरका पिच्छिल जल उससे छायामें उन
...बीजोंको सात भावना देवे अर्थात् भावना दे देकर छायामें सुखाता जावे ॥ २९ ॥
... उन बीजोंको भैंसके गोबरसे घिसकर भैंसके सूखे गोबरके ढेरमें रख छोडे
... जब ओले पडनेपर मिट्टी भीज जावे तब उसी ओलेसे भीगी हुई मिट्टीमें उन
...बीजोंको बोवे तो एकही दिनमें वृक्ष होकर फल लग जावेगा ॥ ३० ॥ तीनों
...उत्तरा, रोहिणी, मृगशिरा, रेवती, चित्रा, अनुराधा, मूल, विशाखा, पुष्य, श्रवण,
...अश्विनी और हस्त यह नक्षत्र दिव्य दृष्टिवाले मुनीश्वरोंने वृक्ष लगानेके लिये
... कहे हैं ॥ ३१ ॥

...श्रीवराहमिहिराचार्यविरचितायां बृहत्सं० लक्ष्मीधरदेवज्ञात्मजवलदेवप्रसादात्मज-
...पंडितबलदेवप्रसादमिश्रविर० भाषाटीकायां वृक्षायुर्वेदाख्यः पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

अथ षट्पंचाशत्तमोऽध्यायः।

प्रासादलक्षण.

कृत्वा प्रभूतं सलिलमारामान्विनिवेश्य च। देवतायतनं कुर्याद्यशोधर्माभिवृद्धये॥ १ ॥ इष्टापूर्तेन लभ्यन्ते ये लोकास्तान् बुभूषता। देवानामालयः कार्यो द्वयमप्यत्र दृश्यते॥ २ ॥ सलिलोद्यानयुक्तेषु कृतेष्वकृतकेषु च। स्थानेष्वेतेषु सान्निध्यमुपगच्छन्ति देवताः॥ ३ ॥ सरःसु नलिनीछत्रनिरस्तरविरश्मिषु। हंसांसाक्षिप्तकह्लारवीचीविमलवारिषु॥ ४ ॥ हंसकारण्डवक्रौञ्चचक्रवाकविराविषु। पर्यन्तनिचुलच्छायाविश्रान्तजलचारिषु॥ ५॥ क्रौञ्चकाञ्चीकलापाश्च कलहंसकलस्वनाः। नद्यस्तोयांशुका यत्र शफरीकृतमेखलाः॥ ६ ॥ फुल्लतीरद्रुमोत्तंसाः सङ्गमश्रोणिमण्डलाः। पुलिनाभ्युन्नतोरस्या हंसहासाश्च निम्नगाः॥ ७ ॥ वनोपान्तनदीशैलनिर्झ-

बहुत जल करके युक्त जलाशय बनाकर और उनके तटपर बाग लगाकर यश और धर्मकी वृद्धिके लिये देवताका मंदिर बनाना चाहिये॥ १॥ यज्ञादि कर्म इष्ट कहाता है और वापी कूप तडागादि बनाना पूर्त कहाता है. इष्टापूर्तसे जो उत्तम लोक मिलते हैं उनके पानेकी इच्छावाला पुरुष देवमंदिर बनानेके द्वारा इष्ट और पूर्त दोनोंहीका फल मिलाता है॥ २॥ जल और उपवनसे युक्त स्थान चाहे किसीके बनाये हुए हों, चाहे स्वाभाविक बने रहें तो उन स्थानोंमें देवता निवास करते हैं॥ ३॥ ऐसे सरोवरमें देवता सदा विहार करते हैं कि जिनमें कमलरूप छत्रसे सूर्य किरण दूर किये हों, हंसपक्षियोंके कंधोंसे प्रेरित श्वेत कमल कि जिनका मार्ग उसमें है. निर्मल जल जिन सरोवरोंमें भरे हैं॥ ४॥ हंस कारंड क्रौंच और चक्रवाक जिनमें शब्द कर रहे हैं और किनारोंके निचुलवृक्षोंकी छायामें जहां जलके जीव विश्राम करते हैं॥ ५॥ क्रौंचपक्षी जिनका कांचीदाम है, कलहंसोंका मधुर शब्द जिनका शब्द है, जल जिनका वस्त्र है, मच्छी जिनकी मेखला है, किनारोंपर फूले वृक्ष जिनके कर्णपूर हैं, जल थलका संगम जिनका श्रोणिमण्डल है, पुलिन जिसके उठे स्तन और हंसही हैं हास्य जिनका उस नीचेको बहनेवाली नदियोंके समीपवर्ती स्थानोंमें देवता सदा रमते हैं॥ ६॥ ७॥ वनके निकट नदी पर्वत और झरनोंके समीपकी भूमिमें नित्य

ान्तभूमिषु । रमन्ते देवता नित्यं पुरेषूद्यानवत्सु च ॥ ८ ॥ भूमयो ब्राह्मणादीनां याः प्रोक्ता वास्तुकर्मणि । ता एव तेषां शस्यन्ते देवतायतनेष्वपि ॥ ९ ॥ चतुःषष्टिपदं कार्यं देवतायतनं सदा । द्वारं च मध्यमं तत्र समदिक्स्थं प्रशस्यते ॥ १० ॥ यो विस्तारो भवेद्यस्य द्विगुणा तत्समुन्नतिः । उच्छ्रायाद्यस्तृतीयोंऽशस्तेन तुल्या कटिः स्मृता ॥ ११ ॥ विस्तारार्धं भवेद्गर्भो भित्तयोऽन्याः समन्ततः । गर्भपादेन विस्तीर्णं द्वारं द्विगुणमुच्छ्रितम् ॥ १२ ॥ उच्छ्रायात्पादविस्तीर्णा शाखा तद्वदुदुम्बरः । विस्तारपादप्रतिमं बाहुल्यं शाखयोः स्मृतम् ॥ १३ ॥ त्रिपञ्चसप्तनवभिः शाखाभिस्तत्प्रशस्यते । अधः शाखाचतुर्भागे प्रतीहारौ निवेशयेत् ॥ १४ ॥ शेषं मङ्गल्यविहगैः श्रीवृक्षस्वस्तिकैर्घटैः । मिथुनैः पत्रवल्लीभिः प्रमथैश्चोपशोभयेत् ॥ १५ ॥ द्वारमानाष्टभा-

देवता रमण करते हैं और उपवनोंसे युक्त नगरोंमेंभी देवता विहार करते हैं ॥ ८ ॥ ब्राह्मण आदि चार वर्णोंको जैसी भूमि पहले गृह बनानेके लिये कह आये हैं वैसीही भूमि उन वर्णोंको देवताके मंदिर बनानेके अर्थ श्रेष्ठ है ॥ ९ ॥ देवमंदिरमें सदा पूर्वोक्त चौसठ पदका वास्तु करना चाहिये उस देवमंदिरमें मध्यम द्वार सम दिशामें स्थित हो तो श्रेष्ठ है ॥ १० ॥ देवमंदिरका जितना विस्तार हो उससे दूनी उसकी ऊंचाई होती है, ऊंचाईकी तिहाई बराबर देवमंदिरकी कटि होती है, सीढीके ऊपर जहांसे देवगृहका आरंभ होता है उसको कटि कहते हैं ॥ ११ ॥ विस्तारसे आधा गर्भ होता है, शेष आधे विस्तारमें चारों ओरकी भीत बनती है, गर्भकी चौथाईके समान द्वारका विस्तार और द्वारके विस्तारसे द्विगुण द्वारकी ऊंचाई होती है ॥१२॥ द्वारकी ऊंचाईकी चौथाईके बराबर शाखा (चौखटका बाजू) और उदुम्बर (चौखटके ऊपरके काठ) की चौडाई होती है, शाखाकी चौडाईकी चौथाईके तुल्य शाखाओंकी मोटाई होती है ॥१३॥ शाखाकी जितनी चोडाई कही उसके बीचमें तीन, पांच, सात अथवा नौ शाखा हों तो द्वार श्रेष्ठ होता है; दोनों शाखाओंके नीचेके चतुर्थांशमें देवताओंके दो प्रतिहारोंकी मूर्ति खोदनी चाहिये ॥१४॥ शाखाओंके शेष तीन चौथाई अंशोंको हंसादि मंगलदायक पक्षी, बेल, स्वस्तिक, सांथिया, कलश, मिथुन (स्त्रीपुरुषका जोडा), पत्र और लतागणोंसे शोभित करे ॥ १५ ॥ द्वारकी ऊंचाईके प्रमाणमें उसका अष्टमांश घटाकर जो बचे वह पिंडिका (देवतास्थापनका पीठ) सहित देवप्रतिमाकी ऊंचाईका प्रमाण होता है- उस पीठके सहित प्रतिमाकी ऊंचाईके तीन भाग करके दो भागके बराबर ऊंची प्रतिमा और एक

गोना प्रतिमा स्यात्सपिण्डिका । द्वौ भागौ प्रतिमा तत्र तृतीयांशश्च पिण्डिका
॥ १६ ॥ मेरुमन्दरकैलासविमानच्छन्दनन्दनाः । समुद्रपद्मगरुडनन्दिवर्धनकुञ्जराः ॥ १७ ॥ गुहराजो वृषो हंसः सर्वतोभद्रको घटः । सिंहो वृत्तश्चतुष्कोणः षोडशाष्टाश्रयस्तथा ॥ १८ ॥ इत्येते विंशतिः प्रोक्ताः प्रासादाः संज्ञया मया । यथोक्तानुक्रमेणैव लक्षणानि वदाम्यतः ॥ १९ ॥ तत्र षडश्रिर्मेरुर्द्वादशभौमो विचित्रकुहरश्च । द्वारैर्युतश्चतुर्भिर्द्वात्रिंशद्धस्तविस्तीर्णः ॥ २० ॥ त्रिंशद्धस्तायामो दशभौमो मन्दरः शिखरयुक्तः । कैलासोऽपि शिखरवान् अष्टाविंशोऽष्टभौमश्च ॥ २१ ॥ जालगवाक्षकयुक्तो विमानसंज्ञस्त्रिसप्तकायामः । नन्दन इति षड्भौमो द्वात्रिंशः षोडशाण्डयुतः ॥ २२ ॥ वृत्तः समुद्रनामा पद्माकृतिः शयानष्टौ । शृङ्गेणैकेन भवेदेकैव च भूमिका तस्य ॥ २३ ॥ गरुडाकृतिश्च गरुडो नन्दीति च षट्चतुष्कविस्तीर्णः । कार्यश्च सप्तभौमो

भागके समान ऊंची पिंडिका (पीठ) बनाना चाहिये. यह प्रमाण सब प्रकारोंके लिये कहा है ॥ १६ ॥ मेरु, मंदर, कैलास, विमानच्छंद, नंदन, समुद्र, पद्म, गरुड, नंदिवर्धन, कुंजर ॥ १७ ॥ गुहराज, वृष, हंस, सर्वतोभद्र, घट, सिंह, वृत्त, चौकोण, षोडशाश्रि और अष्टाश्रि ॥ १८ ॥ यह वीस नाम हमने प्रासादोंके कहे अब नामके क्रमसे इनके लक्षण कहते हैं ॥ १९ ॥ छः कोणवाला मेरुनामक प्रासाद होता है, जिसमें बारह भूमिका खंड होता है और अनेक भांतिके भीतरी गवाक्षों करके युक्त होता है; उसमें चार द्वार चारों दिशाओंमें होते हैं और उसका विस्तार बत्तीस हाथ होता है, चौसठ हाथ ऊंचाई होती है ॥ २० ॥ षट्कोण तीस हाथके विस्तारवाला, दश भूमिकाओंसे युक्त और शिखरोंसे युक्त मंदर प्रासाद होता है; कैलास प्रासादभी शिखरोंसे युक्त, अट्ठाईस हाथ विस्तारवाला, आठ भूमिकाओं करके युक्त और षट्कोण होता है ॥ २१ ॥ जाली झरोखेदार इकीस हाथ विस्तारका और आठ भूमिकाओंसे युक्त षट्कोण विमानच्छंद नामक प्रासाद होता है, नंदन प्रासाद षट्कोण, छः भूमिकाओंसे युक्त, बत्तीस हाथ विस्तारवाला और सोलह अंडोंकरके युक्त होता है ॥ २२ ॥ समुद्रनाम प्रासाद गोल होता है, वे दोनों प्रासाद आठ हाथ चौडे होते हैं, इनमें एकही शृंग होता है और दोनों एक २ भूमिकासे युक्त होते हैं ॥ २३ ॥ गरुड प्रासाद गरुडके आकारवाला होता है परन्तु उसके पंख और पूंछ नहीं होते, न

१ अंड प्रासादके ऊपर हुआ करते हैं जिनको शिखर या शृंग कहते हैं।

विभूषितोऽण्डैश्च विंशत्या ॥ २४ ॥ कुञ्जर इति गजपृष्ठः षोडशहस्तः समन्ततो मूलाद् । गुहराजः षोडशकस्त्रिचन्द्रशाला भवेद्वलभी ॥ २५ ॥ वृष एकभूमिश्रृङ्गो द्वादशहस्तः समन्ततो वृत्तः । हंसो हंसाकारो घटोऽष्टहस्तः कलशरूपः ॥ २६ ॥ द्वारैर्युतश्चतुर्भिर्बहुशिखरो भवति सर्वतोभद्रः । बहुरुचिरचन्द्रशालः षड्विंशः पञ्चभौमश्च ॥ २७ ॥ सिंहः सिंहाक्रान्तो द्वादशकोणेऽष्टहस्तविस्तीर्णः । चत्वारोऽञ्जनरूपाः पञ्चाऽण्डयुतस्तु चतुरस्रः ॥ २८ ॥ भूमिकांऽगुलमानेन मयस्याष्टोत्तरं शतम् । सार्धं हस्तत्रयं चैव कथितं विश्वकर्मणा ॥ २९ ॥ माहुः स्थपतयश्चात्र मतमेकं विपश्चितः । कपोतपालिसंयुक्ता

